[ L. & M. / 64 ]

4,000—22-10-10.

Educational
~~Local & Munl.~~ (1912) Department.

MISCELLANEOUS.

G.O., No. 453

DATED 28-3-1912

49

[Despatch Abstract.]

Sanskrit journal Sanctioning for ten copies of the — entitled 'Grantha Pradarsani' published by Messrs S.P.V. Ranganathaswami Aiya Vizagapatam sanctioning for their distribution

## BACK PAPERS.

| G.O. | No. | Department. | Date. | G.O. | No. | Department. | Date. |
|---|---|---|---|---|---|---|---|
| | | | | | | | |

## FURTHER PAPERS.

| G.O. | No. | Department. | Date. | G.O. | No. | Department. | Date. |
|---|---|---|---|---|---|---|---|
| | | | | | | | |

[G./1]
9,000—[illegible]5-11.

*Public* DEPARTMENT.

# CURRENT FILE.

PAPERS PUT UP WITH CURRENT No. ______

Papers of the department to which the current belongs.

| Number. | Date. | Original (=O.) or spare copy (=S.C.) | Remarks. (In this column such of the papers as have been removed for copying, printing, etc., should be marked with a cross.) | Initials of clerk with date in token of return to section. |
| --- | --- | --- | --- | --- |
| | | | | |

Papers of other departments.

| Department. | Number. | Date. | Original (= O.) or spare copy (= S.C.). | Initials with date of (1) clerk of the Chief Secretariat department acknowledging return of the paper concerned or (2) Despatcher to denote the return of the papers to departments outside the Chief Secretariat. |
| --- | --- | --- | --- | --- |
| | | | | |

CURRENT NO. 1784 PUBLIC

CHIEF SECRETARIAT M. 20 MAR 1912 M. MADRAS GOV'T

SECRETARY (PUBLIC ETC., DEPARTMENTS) 20 MAR 1912 GOVT. OF MADRAS

Regd 20-3-12

To

The Chief Secretary
to the Government of Madras,
Madras.

The humble petition of S.P.V. Ranganathaswami Aryavaraguru, Editor of Grantha Pradarsani of Vizagapatam.

Honoured Sir,

I, the undersigned beg your honour to bring the following to your kind consideration. I am editing a Sanskrit Journal called Grantha Pradarsani, a collection of rare oriental works, and have carried it through 35 numbers. I herewith send a copy of each of Nos. 34 and 35. for your perusal. Since there is no good Sanskrit Journal published in these parts and since even the Kāvyamāla of Bombay and the Pandit of Benares are being no longer issued, there is not any good Sanskrit Journal in India. I, therefore, began to edit this Journal to make up for this want. As for the importance of this Journal I beg to state that it was quoted by Prof. Aufrecht in his Catalogus Catalogorum and by Prof. Hultzch in the

Put up.

P.T.O.

Preface to his edition of Prakrita Rupavatara, published by the Royal Asiatic Society of Great Britain and Ireland.

Owing to the poor reception and encouragement which Sanskrit receives in these parts, I find it very hard to push on with the work of this Journal. So I request your honour to subscribe for at least fifty copies of this Journal and thus enable me to carry it on in the future, for which act of kindness I shall as in duty bound ever pray.

I beg to remain,
Honoured Sir,
Your most obedient Servant.

Arsha Press,
Vizagapatam,
17th March 1912.

S. K. Ranganathaswami

DIRECTOR OF PUBLIC INSTRUCTION
5 - APR 1912
MADRAS.

3/

Educational Department

C.No. 1014.

Endt. No 1014-1 dt. 2-4-12

Referred to the D.P.I who is requested to obtain the opinion of the Curator, Govt. Oriental Manuscripts Library, Madras on the request contained in the petition.

DP
30.3.12

D.P.I with appln & 2 copies of journal
CR
1.4.12
4/4/12

To,
The D.P.I with application in original and 2 copies of the journal to be returned with reply.

Stock Form No. 151.
5,000 - 30-6-11.

Educational

# LOCAL AND MUNICIPAL DEPARTMENT.

LOCAL AND MUNICIPAL SECRETARIAT. 7 MAY 1912

CURRENT No. 1334

Received ........ 191 . Registered 8 — 5 — 1912.

*Subject.*

Grandha Pradharsani — Submitting letter from the Curator, Oriental manuscripts library giving his opinion on the book entitled ——

| ENCLOSURES. |
| --- |
| No. |
| Spare copies |

R.C. No 2921/12

*Station* Madras, *Dated the* 4th May 1912.

*From (Name)* The Hon'ble Mr. A. G. Bourne, D.Sc. F.R.S. C.I.E.

*(Designation)* Director of Public Instruction Madras

*To the Secretary to the Government of Madras,*

*Educational Local and Municipal Department.*

*Sir,*

PR

6

Ref. on Cur. No. 2921/12 dated 4th May 1912.

Submitted to Government with reference to endorsement No. 1014-1 Educational, dated 2nd April 1912 herewith returned.

For Director of Public Instruction.

P.V.S.

4.5.12

... be given at the end

# Department of Public Instruction.

20 APR 1912
R.C. 2921/12
MADRAS.

## GOVERNMENT ORIENTAL MANUSCRIPTS LIBRARY.

N. R. C. No. 88, dated 20 — 4 — 1912.

| | | | |
|---|---|---|---|
| Despatched / Received | 20 } - 4 - 1912 | Enclosures. | 4 (iv) End. of Under Secy; petition, and two copies. |
| | | Spare copies. | |

Subject.

Stating that the journal "Granthapradarsani" is a useful literary publication containing rare unpublished works, and deserves encouragement.

Government Oriental MSS. Library,
Pantheon Road, Egmore,
Madras, 20th April 1912.

N.R.C No. 88

From

M.R.Ry. Rao Bahadur M. RANGACHARYA, M.A.,
Curator, Govt. Oriental MSS. Library,
Madras,

To

The Director of Public Instruction,
Madras.

Sir,

With reference to your N. Ref. on C. No 2921/12 dated the 12th April 1912, requiring me to express an opinion on the request contained in the petition of S.P.V. Ranganatha swami Aryavaragaru, Editor of "Grantha Pradarsani", I have the honour to state that the journal is a useful literary publication containing rare unpublished works, and deserves encouragement. If, however, fifty copies of the journal be purchased in accordance with the request of the petitioner, they cannot all be properly utilized. I recommend that ten copies thereof may be subscribed for by the Government, and that as a further help a suitable honorariam may, if considered desirable, be given at the end of each year, after making sure that all the twelve monthly numbers have been duly issued.

2. The enclosures are resubmitted.

I have the honour to be,
Sir,
Your most obedient servant

M. Rangachari
Curator,
Govt: Oriental Mss. Library.

200—18-8-10.

Regd 20.3.12.
Encl 8 CM

MARCH, 1912.

SECRETARIAT LIBRARY 20 MAR 1912

# ग्रन्थप्रदर्शनी

नाम

नानाविधप्राचीनापूर्वमहाग्रन्थानां संग्रहः

# Grantha Pradarsani

A

COLLECTION OF RARE AND ANCIENT ORIENTAL WORKS

EDITED AND PUBLISHED BY

**S. P. V. Ranganathasvami Aryavaraguru,**

*Grandson & grateful Pupil of Mahamahopadhyaya*

*Sri Paravastu Venkata Rangacharya Aryavaraguru,*

**35**

PRINTED BY G. R. KRISHNA MURTY,

**at the ARSHA Press, Vizagapatam.**

**1912**

Agent:— Otto Harrassowitz, Leipzig.

*REGISTERED ACCORDING TO ACT XXV. OF 1867*

7 MAY 1912 SECRETARIAT

## CONTENTS


| | Pages. |
|---|---|
| 1. *Prákritasarvasva of Márkandéya Kavíndra* by BHATTANATHA SVAMIN | 29—56 |
| 2. *Aphorisms of Jaina Prákrita Grammar of Trivikrama* by the Editor. | 5— 8 |




९५. **चार्वङ्ग्यां रस्य च लुक्**

विकर्षः प्रागुच्च स्यात् । रस्य च लुक् स्यात् । चाउअंगी ॥

९६. **द्वारे वाद्योः क्रमाल्लुक्च ॥**

द्वारे विकर्षो वा स्यात् । प्रागुच्च ॥ दुआरं ॥ विकर्षाभावपक्षे दवयोः क्रमात् लुक् स्यात् । वारं । दारं ॥

इति श्रीमार्कण्डेयकवीन्द्रकृतौ प्राकृतसर्वस्वे भाषाविवेचने
महाराष्ट्र्यां युक्तवर्णविधिस्तृतीयः पादः ॥ ३ ॥

१. **सन्धौ बहुलमचामज्लोपविशेषाः**

परः संनिकर्षः सन्धिः । सन्धौ विषये अचामज्लोपो विशेषश्चेत्येते बहुलं स्युः । अज्यथा—मज्झिमं, उत्तिमं, सप्तपर्णः छत्तिवण्णो, मरहट्ठो, इत्यादौ नित्यम् : जउणाअडं, जउणअडं ; लच्छिवई, लच्छीवई ; भुअवत्तं, भुआवत्तं ; वहुमुहं, वहूमुहं ; वेणुवणं, वेणूवणं ; कण्णिआरो, कण्णआरो ; परप्परं, परुप्परं ; वाऊलो, वाउलो ; अक्खउहिणी, अक्खोहिणी ; चंदउदओ, चंदोदओ(?); इत्यादौ विकल्पः । लोपो यथा—पलगण्डे पलंडो ; वेतण्डे वेंडो ; इत्यादौ नित्यम् : सोअमल्लं, सोमल्लं ; पाअवडणं, पावडणं ; पाअवीढं, पावीढं ; अंधआरो, अंधारो ; खंधाआरो, खंधारो ; कुंभआरो, कुंभारो ; चक्कआओ, चक्काओ ; राअउलं, राउलं ; राअउत्तो, राउत्तो ; काअइंची, काइंची ; इत्यादौ विकल्पः । विशेषो रूपान्तरप्राप्तिर्यथा—उहअवासं उभयपार्श्वं, अवहोवासं ; उहअमुहं उभयमुखं, अवहोमुहं ; जअकारो, जोक्कारो ; सुअण्णं, सोण्णं ; परोवरं, परोप्परं । एवं बहुल्यान्नानाविधा विधयो लक्ष्यानुसारतो ज्ञेयाः ॥

२. **युते ह्रस्वः ।**

युते युक्ते परे दीर्घो ह्रस्वः स्यात् । सामलङ्गो । मइन्दो मृगेन्द्रः । सल्लुद्धारो । रण्णा । रण्णो । तिण्णं । बाहुल्यात् पुणोत्तं, तेत्तीसा, णेत्तं, गोत्तं, दोण्णं, इत्यादि ॥

३. **शेषे द्वित्वमनाप्ते दीर्घः स्यात्**

परे इत्यर्थे सप्तमी । ऊसुओ । ऊसवो । वीसासो । वीसामो । अश्वः अस्सं आसो आसं । बाहुल्यात् दुलहं ;—'दरपुरिसाइारि विसमिरि जाणसु पुरिसाण जं दुक्खं (गा० स० १।५२)' इति सप्तशती ॥

४. **गुण इतः क्वापि ॥**

स्यात् । गणेसरो, चंदोदओ ; पिओवगमणं, इत्यादौ नित्यम् । वेग्गो,



विअग्गो ; वेंजणं, विअंजणं ; इत्यादौ विकल्पः । अविएत्थ, तुअइ, अहरोट्ठं इत्यादौ नित्यम् (?) ॥

५. **विंशत्यादौ बिन्दोर्लुक् तेर्वा दीर्घता चादेः ।**

विंशत्यादौ बिन्दोर्लुक् स्यात्, तेर्लुग्वा स्यात्, आदेश्च दीर्घता स्यात् ॥ वीसा । वीसई ॥ तीसा ॥ तेत्तीसा ॥ तेवीसा । तेवीसई ॥ —'आदीतौ बहुलम् (स० ५।३०)' इत्यात् ॥

६. **ओत्वं लुक्च विसर्गस्य**

क्वचिदोत्वं क्वचिल्लुक्च स्यात् ॥ सरोरुहं । सररुहं ॥ मणोहरो । मणहरो ॥ क्वचिल्लुगेव । सरवरो । णहअलं । उरअडं ॥ णिराउसा, णिरणुक्कोसो ; णिरन्तरं, णिरुवमं, दुराआरो, दुरीसओ, दुरइक्कमो, पुणरुत्तं, पुणरवि, इत्यादयः प्रयोगाः संस्कृतादुन्नेयाः ॥

७. **दोर्लोपः स्यादुदुम्बरे ॥**

उंबरो ॥

८. **यसश्च संख्याशब्दानां**

यसो लोपः स्यात् । तेरह । तेवीसा । तेत्तीसा । तेचत्तारीसा । तेवण्णासा । एत्वं शय्यादेराकृतिगणत्वात् ॥

९. **यावदादिषु वस्य वा ।**

लोपः स्यात् ॥

यावत्तावद्देवकुलमेवमेवावटस्तथा ।
जीवितावर्तमानाद्या विज्ञेया यावदादयः ॥

जा । जाव ॥ ता । ताव ॥ देवउलं । देउलं ॥ एअमेअ । एमेअ ॥ अवडो । अडो ॥ जीविअं । जीअं ॥ 'सन्धौ (प्रा० स० ४।१)' इत्यादिना इकारस्यात् । आवट्टमाणो । अट्टमाणो ॥ आदिशब्दात् आवट्टणा, अट्टणा ; पावरओ, पारओ ॥

१०. **कालायसे यस्य**

लोपो वा स्यात् ॥ कालाअसो । कालासो ॥

११. **दस्य हृदये**

दस्य लोपो वा स्यात् ॥ हिअअं । हिअं ॥

१२. **जस्य भाजने ॥**

जस्य लोपो वा स्यात् ॥ भाअणं । भाणं ॥

१३. **अन्त्यस्य हलो नित्यम्**

लोपः स्यात् । जसो । मणो । इन्दई ॥

१४. **विदुचद्वर्जं स्त्रियामात्स्यात् ।**

अन्त्यहल इत्येव । सरिआ । पाडिवआ । विदुचाति तु विज्जू ॥

१५. **री रा**

स्त्रियामन्त्यहलो रः स्थाने रा स्यात् । गिरा । धुरा ॥

१६. **क्षुधि हा**

क्षुधि अन्त्यहलो हा स्यात् । छुहा ॥

१७. **शरदो दः स्यात्**

अन्त्यहल इत्येव । सरओ ॥

१८. **दिक्प्रावृषोः सः स्यात् ॥**

अन्त्यहल इत्येव । दिसा । पाउसो ॥

१९. **आयुरप्सरसोर्वा स्यात्**

अन्त्यहलः स इति च ॥ आऊ । आउसो ॥ अच्छरा । अच्छरसा ॥

२०. **वक्रादौ बिन्दुरिष्यते ।**

बिन्दुरागमः । स च लक्ष्यानुसारात्क्वचित्प्रथमाद्वर्णात्क्वचिद्द्वितीयाच्च परः ॥

वक्रत्र्यश्रवयस्याश्रुश्मश्रुनिवसनदर्शनस्पर्शाः ।
शुल्कप्रतिश्रुतमनस्विगृष्टिपुच्छातिमुक्ताद्याः ॥

वंकं ॥ तंसं ॥ वअंसो ॥ अंसू ॥ मंसू ॥ णिअंसणं । धातूपलक्षणमिति केचित् । विअंसणं ॥ दंसणं ॥ फंसो ॥ सुंकं ॥ पडंसुत्तं ; बाहुल्यादिकारस्यात् ॥ मणंसी ॥ गंठी ॥ पुंछो ॥ अइंमुत्तं ॥

२१. **मश्च**

अन्त्यहलो मकारस्य बिन्दुः । किं । वणं । तुण्हिं । 'सन्धौ (प्रा० स० ४।१)' इत्यादिना ह्रस्वत्वमनुस्वारात्पूर्वं वक्तव्यम् ॥



२२. **अचि वा**

अचि परे मो बिन्दुर्वा स्यात् ॥ परं आअदो । परमाअदो ॥

२३. **नङोर्हलि**

हलि परे नङोर्बिन्दुः स्यात् ॥ विंझो ॥ पंती ॥

२४. **तद्वर्गान्तो न वा वर्गे ॥**

वर्गे परे बिन्दुस्तद्वर्गान्तो न वा स्यात् ॥ हलं कड्ढइ । हलङ्कड्ढइ ॥ मन्तं जवइ । मन्तञ्जवइ ॥ पिअं णेइ । पिअण्णेइ ॥ हरिं णमइ । हरिन्नमइ ॥ जलं मन्थइ । जलम्मंथइ ॥

२५. **लुग्वा मांसादौ**

मांसादौ बिन्दुर्लुग्वा स्यात् ॥

मांसं मांसलसम्मुखमेवमिदानीं कथं नूनम् ॥

मंसं । मासं ॥ मंसलं । मासलं ॥ संमुहं । समुहं ॥ एअ । एअं ॥ इआणि । इआणिं ॥ कह । कहं ॥ णूण । णूणं ॥ आकृतिगणोयम् ॥

२६. **सिंहे संस्कारादौ च नित्यं स्यात् ।**

बिन्दुर्लुगित्येव ॥ सीहो ॥ सक्कारो । सक्कअं । सक्किरिआ । सत्थवो । सत्थुअं । सत्थावो ॥

२७. **पुंसि न्सन्तप्रावृट्छरदः प्रेमादिवर्जं स्युः ॥**

नन्ताः सन्ताः प्रावृट् शरदित्येते पुंसि स्युः प्रेमादिवर्जम् । कम्मो ॥ जसो ॥ पाउसो ॥ सरओ ॥ प्रेमादिवर्जमिति किम् । पेम्मं । सिरं । णहं । अच्छरा ॥

२८. **काश्मीरसीमोष्मेमानः स्त्रियाम्**

कसुमीरा ॥ सीमा ॥ उम्हा ॥ इमन्प्रत्ययः ।—'पत्ता दिणं वड्ढिमा' ॥

२९. **प्रश्नाक्षिसन्धयः ।**
**पृष्ठरश्मी च वा**

एते पञ्च स्त्रियां वा स्युः ॥ पण्हो । पण्हा ॥ अच्छि । अच्छी ॥ संधि । संधी ॥ पुट्ठं । पुट्ठी ॥ रस्सी ॥

३०. **अन्येषामत्र शिष्टानुसारतः ॥**

अत्र प्राकृतानुशासने अन्येषां लिङ्गं शिष्टप्रयोगानुसारतो ज्ञेयम् । यथा—

गुणा, गुणाइं; बिंदुणो, बिंदूइं; वअणो, वअणं; णअणो, णअणं इत्यादि दिङ्मात्रम् ॥

३१. **अवापयोरोत्**

अनयोरोद्वा स्यात् ॥ ओवाहइ । अववाहइ ॥ ओसरइ । अवसरइ ॥

३२. **माल्ये निरः**

माल्ये परे निर ओ वा स्यात् ॥ ओमालिअं । निम्मालिअं ॥

३३. **उच्चोपस्य कस्यचित् ।**

कस्य चिन्मते उपस्य उत्स्याद्वा । चकारादोच्च । उहसइ । ओहसइ । उअहसइ ॥

३४. **त्वस्य त्तणं स्यात्**

तद्भावे विहितस्य । वेत्येव । सिसुत्तणं । सिसुत्तं ॥

३५. **ताया दा**

वेति निवृत्तम् । ताया दा स्यात् । पीणदा । जणदा ॥

३६. **क्त्वायचोस्तूणतूणमौ ॥**

**तो द्विर्लुक्च क्वचित्**

क्त्वायचोः स्थाने तूणतूणमौ स्याताम् । अनयोस्तकारस्य क्वचिद्द्विर्भावश्च क्वचिल्लुक्च स्यात् ॥ घेऊण, घेत्तूण । घेऊणं, घेत्तूणं ॥ सोऊणं; अत्र न द्विः ॥ हन्तूण; हन्तूणं ।—'नङोर्हलि (प्रा० स० ४।२३)' इति बिन्दुः । ततो वर्गे तद्वर्गान्तः (प्रा० स० ४।२४) । हत्तूण इत्यन्त्यहल्लोपे द्वित्वम् । हणिऊण इत्युक्तेत्वे(?) ॥ एवं छेत्तूण जेत्तूण जोत्तूण भोत्तूण मोत्तूण रोत्तूण सेत्तूण इत्यादयः । एषां तुमादौ छेत्तुं भेत्तुं रोत्तुं रोतव्वं इत्यादयश्च दृश्यन्ते ॥

३७. **इअ उआणश्च**

क्त्वायचोः स्याताम् ॥ हणिअ । सुणिअ । आरंभिअ ॥ घेउआण । सोउआण ॥ चकारात्तूणतूणमौ पूर्ववत् ॥

३८. **क्वचिच्च तुम् ।**

क्त्वायचोरित्येव । काउं कृत्वा । परिरंभिउं परिरभ्य । क्वचिदिति शिष्टप्रयोगानुसारार्थम् । चकारात् इअ उआणश्च तथैव ॥



३९. **त्वा च दठ्ठूणमित्याद्याः**

तूण तूणमोस्तूकारेण सह दठ्ठूणमित्याद्याः स्युः । चकारोऽयं पूर्वोक्तसमुच्चयार्थः । दृश्यादीनामर्थात् ।—'दठ्ठूण गआगअं च मारुअतणअं'।—'कढ्ढूण व कालिन्दि'। वढ्ढूणं, चग्गूणं(?) इत्यादि ॥

४०. **वन्तः स्यात् क्तवतोर्वतोः ॥**

क्तवतोर्वतोः स्थाने वन्तः स्यात् । गअवंतो । कअवंतो ॥

४१. **तृङेरिर**

तच्छीलादौ विहितस्य तृङेरिरः स्यात् । भमिरो । सहिरो ॥

४२. **आलिवल्लोल्लालवंतेंतास्तु मतोर्मताः ।**

मतुप्प्रत्ययस्य स्थाने अलु इल उल्ल आल वंत इन्त इत्येते षट् मताः । ईसालू । गुणिल्लो । धणुल्लो । हरिसालो । पुण्णवंतो । घरिंतो ॥

४३. **हनोर्मन्तः**

मतोर्मतः स्यात् । हणुमंतो । हनुमानित्यस्यान्त्यहल्लोपे हणुमा ॥

४४. **इणो वा स्यात्**

इण उत्तरस्य मतोर्मन्तो वा स्यात् ॥ अग्गिमंतो । अग्गिवंतो ॥ अंसुमंतो । अंसुवंतो ॥

४५. **आल्वन्तादिण्णपि स्त्रियाम् ॥**

आल्वादेश उत्तर इण्णपि वा स्यात् स्त्रियाम् । ततः स्त्रियामीप्रत्ययः । लज्जालुइणी अज्जा, लज्जालू वा ॥

४६. **उल्लस्तस्येदमित्यर्थे**

इण इति निवृत्तम् । तस्येदमित्यर्थे नाम्न उल्लः स्याद्वा । राउल्लं सेण्णं, राअईअं वा ॥

४७. **इल्लस्तत्र भवे भवेत् ।**

वेत्येव । पुरिल्लो, पोरो वा ॥

४८. **स्वार्थे च हश्च**

स्वार्थे च उल्लेल्लौ स्याताम् । हश्च स्वार्थे स्यात् । वेत्येव ॥ पुत्तुल्लो । पुत्तिल्लो । पुत्तहो । पुत्तो ॥ एक्कोल्लो; एक्केल्लो; अत्र बाहुल्यान्न ह्रस्वः । एक्कहो ॥

४९. दीर्घैकाद्रल्लौ

वेत्येव। स्वार्थे दीर्घाद्रः स्यात्, एकात् ल्लः स्यात्। दीहो। दीहरो। अनभिधानात् द्वित्वपक्षे न स्यात्; दिग्घो ॥ एक्को। एकल्लो ॥

५०. लस्तु पीतविद्युद्भ्याम् ॥

अन्यव्यवच्छेदार्थस्तुशब्दः। पीतविद्युद्भ्यां लः स्याद्वा॥ पीअं। पीअलं॥ विज्जू। विज्जुला; विज्जुली ॥

५१. एभ्योऽपि कः

एभ्यः सर्वेभ्यः स्वार्थिकप्रत्ययेभ्योऽपि स्वार्थे कः स्यात्। एक्केल्लओ। पुत्तहओ। दीहरओ। विज्जुलिआ ॥ अपिशब्दान्नाममात्रादपि। पुत्तओ। रुक्खओ ॥ स्वार्थ इत्युपलक्षणम्; अज्ञातादिष्वपि स्यात्। यथोक्तम्—

'अज्ञाते कुत्सिते बाल्ये तथा ह्रस्वानुकम्पयोः।
उत्कर्षार्थे च संज्ञायां कप्रत्यय उदाहृतः ॥' इति।

को एसो रुक्खओ, दुराआरओ, इत्यादि ॥

५२. इअ मयटः

सुलोपः सूत्राणां छन्दोवत्त्वात्। मयटः स्थाने इअः स्याद्वा ॥ सुवण्णिओ। सुवण्णमओ ॥

५३. हुत्तं कृत्वोर्थ आभिमुख्ये च।

वेति निवृत्तम्। कृत्वःप्रत्ययार्थे आभिमुख्ये च नाम्न उत्तरे हुत्तं स्यात्। पञ्चहुत्तं भुञ्जइ।—'परहुत्तमणेण परएण' ॥

५४. बृन्दे दस्य द्रः स्यात्

बिंद्रं। बिंद्रावणं।—'मोरबिंद्राणं'। ऋष्यादीनामाकृतिगणत्वाद्दत इत्वम् ॥

५५. स्थितिपरिवृत्ती रणोः करेण्वां स्यात् ॥

करेण्वां रणोः स्थितिपरिवृत्तिः स्यात्। एसा कणेरू ॥ स्त्रीलिङ्गनिर्देशात्पुंसि न स्यात्। करेणू मत्तो ॥

५६. हरयोश्च महाराष्ट्रस्य

स्थितिपरिवृत्तिः। मरहट्ठो ॥

५७. इतरथायां न वा रथयोः।



रेफथकारयोः स्थितिपरिवृत्तिर्न वा स्यात् ॥ इअहरा। इअरहा ॥

५८. आलाने ल्नोः

वेति निवृत्तम्। स्थितिपरिवृत्तिः स्यात्।—'आणालक्खंभेसु व (से० ३।१)'

५९. लटयोर्ललाटे

स्थितिपरिवृत्तिः स्यात्। लडालं ॥

६०. आदेश्च णः क्वचित् ॥

णडालं ॥

६१. अपतौ घरो गृहस्य

गृहस्य घरः स्यात्। घरं। अमरघरं ॥ अपताविति किम्। गिहवई ॥

६२. स्यातां च बृहस्पतावभौ हबयोः।

बृहस्पतौ हबयोः क्रमादभौ स्याताम्। भअप्पई ॥

६३. मलिने लिनोरिलौ वा स्याताम्

मइलं। मलिणं ॥

६४. दाढादयो बहुलम् ॥

दंष्ट्रादिषु दाढादयो बहुलं बाहुलकेन भवन्ति। तच्च—

'क्वचित्प्रवृत्तिः क्वचिदप्रवृत्तिः क्वचिद्विभाषा क्वचिदन्यदेव।
विधेर्विधानं बहुधा विचिन्त्य चतुर्विधं बाहुलकं वदन्ति ॥'

तथाहि—दंष्ट्रादिषु दाढादय इत्यत्र प्रवृत्तिः। भस्मादिषु भसुम इत्यत्राप्रवृत्तिः; नहि ततः खादयः कदापि भवन्ति; तदर्थक्षारादीनां छारादय एव भवन्ति। उत्पलादौ कंदोट्टं उप्पलमित्यादौ विकल्पः। तुङ्गतरङ्गमन्दरमन्दिरादिषु तुङ्गतरङ्गमन्दरमन्दिरादय एवेति क्वचिदन्यदेवेति प्राकृतविजातीय संस्कृतमेवेत्यर्थः। केवलमेषां प्रकृत्यन्तरानिरपेक्षाणां प्रत्ययादिविकारित्वेन प्राकृतत्वम्। देश्याः शब्दास्तु पोट्टादिविकल्पसिद्धास्तेषां मूलशब्देनापि प्रयोगदर्शनात्; यथा पोट्टं उअरं चेति ॥ दंष्ट्रायां दाढा; दुहितरि धूआ, सुभगायां सुहवी, दुर्भगायां दुहवी; स्नुषायां च सोह्वा, दिष्ट्या दिट्ठिआ; विप्रे विप्पलो; कपाले कडप्पो; अलाबुवीणायां अलावणी; भ्रूलतायां भुमआ; वैदूर्ये वेरुलिअं; दक्षिणे दाहिणं; गोदावर्यां गोला; उभयतोमुखे

अवहोमुहं; स्तोके थोकं(?); स्थविरे ठेरो ; पुनरर्थे उण ; शनैः सणिअं ; मनाक् मणं ; सुकुमारे सोमालं ; आतोद्ये आउज्जं ; मातुलानी मामी मल्लाणी ; तावति तेत्तिअं ; ते तव ; अहं अं ; यावति जेत्तिअं जेद्दहं ;—'जेत्तिअमेत्तं तीरइ (गा० स० १।७०)' एतावति एत्तिअं एद्दहं ;—'एद्दहमेत्तत्थणिआ (का० प्रदी० ५४ पृ०)' ; कियति केत्तिअं केद्दहं ;—'केत्तिअमेत्तं व (गा० स० ३।३९)' ; बलीवर्दे बइल्लो ; प्रावरणे पंगुरणं ; स्त्रियां गवि गावी , वलोपे गाई ; शूर्पे चिल्लं ; तिरश्चि तिरच्छं ; हठे बलामोली ; वनितायां विलआ ; चर्चायां चत्ता ; मातृष्वसरि माउच्छा माउस्सिआ ; पितृष्वसरि पिउच्छा पिउस्सिआ ; इत्यादयो नित्यम् । कंदोट्टं उप्पलं ; शुक्तौ सिप्पी सुत्ती ; स्तोके थोअं थोकं ; पद्मे पउमं पोम्मं ; च्छेके छेओ छइल्लो ; श्वश्र्वां सस्सू अत्ता ; विदर्भे विच्छोमो विअब्भो ; भ्रमरो भसलो ; प्रगल्भे तरट्टो पअब्भो ; गाढं णिपट्टं ; संबन्धी केरो ,—'मह मंदभाइणीए केरं (का० प्रदी० ५९ पृ०)' ; अवगुण्ठणं ओढणं ; णिज्झरो ओज्झरो ; बहिर्भूते बहिरं बाहिरं ; जुअळी संघाडी ; इत्यादौ विकल्पः । भस्मादयस्तु भस्मग्लौस्मरस्वभूविष्टविस्तरसारवष्मौश्राश्लेषद्धन्यबहिरोजःप्रभृतयः (?) । नैते सर्वथा स्वयं व्युत्पाद्य प्रयोज्याः । किन्तु तदर्थक्षारचन्द्रमदनादय एव प्रयोज्याः ॥

इति श्रीमार्कण्डेयकवीन्द्रकृतौ प्राकृतसर्वस्वे भाषाविवेचने महाराष्ट्र्यां संकीर्णविधिश्चतुर्थः पादः ॥ ४ ॥

१. सावत ओत्स्यात्

सौ प्रथमैकवचने । इदुतो (प्रा० स० ५।१७) रिति पर्यन्तमत इत्यनुवर्तते । रुक्खो । अन्त्यहल्त्वात्सुलुक् । जसो । कम्मो ॥

२. एतदि वा

एतदि शब्दे स्थितस्यात ओत्स्याद्वा सौ परे । एस जणो । एसो रुक्खो ॥

३. लोपो जश्शसोः

वेति निवृत्तम् ; एतदिति च । अतः सम्बन्धिनोर्जश्शसोर्लोपः स्यात् ॥ रुक्खा सोहन्ति ॥ रक्खे पेच्छ ॥

४. अमोऽतश्च ।

अत इत्येव । अतः सम्बन्धिनोऽमोऽतो लोपः स्यात् । रुक्खं ॥

५. टामोर्णं

अतष्टामोर्णं स्यात् ॥ रुक्खेणं ॥ रुक्खाणं ॥

६. भिस् हिं

अतो भिस् हिं स्यात् । रुक्खेहिं ॥

७. ङसिरादोदुहयः

आ दो दु हि इति चतुर्था ङसिः स्यात् ॥ रुक्खा । रुक्खाओ । रुक्खाउ । रुक्खाहि । दकरणं भाषान्तरार्थम् ॥

८. भ्यसो हिंतो ॥ सुंतो च

अतो भ्यसो हिंतो सुंतो च स्यात् ॥ रुक्खेहिंतो । रुक्खेसुंतो ॥

९. ङसः स्सः

अतो ङसः स्सः स्यात् । रुक्खस्स ॥

१०. ङेरेम्मी स्याताम्

अत इत्येव ॥ रुक्खे ॥ रुक्खम्मि ॥ सन्धावप्येत्वे प्राप्ते एत्वविधानमेकपदे

स्वरसंधिनिषेधं ज्ञापयति। तेन बालाइ, नईइ ॥

११. सुपः सुं स्यात्।

रुक्खेसुं ॥

१२. दीर्घो जस्ङस्याम्सु

एष्वतो दीर्घः स्यात् ॥ रुक्खा सोहन्ति ॥ रुक्खाओ। रुक्खाउ। रुक्खा। रुक्खाहि। रुक्खाणं ॥

१३. भ्यसि वा

भ्यसि परेऽतो दीर्घो वा स्यात्। रुक्खाहिंतो, रुक्खेहिंतो। रुक्खासुंतो, रुक्खेसुंतो ॥

१४. ङिङसौ विना सुप्येत् ॥

सुपीति प्रत्याहारसत्त्वम्। सुपि परे अत एत्स्यात्। दीर्घस्य विशेषविधित्वात्तदतिरिक्तोऽस्य विषयः ॥ शसि रुक्खे ॥ रुक्खेणं ॥ रुक्खेहिं ॥ रुक्खेसुंतो। रुक्खेहिंतो ॥ रुक्खेसुं ॥ ङिङसोस्तु—रक्खम्मि; रुक्खस्स ॥

१५. नैतावनामि कतिपञ्चाद्योः

कत्यादेः पञ्चादेश्चानामि सुपि परे एतौ दीर्घ एच्च न स्याताम्। जश्शसोर्लोपस्तु भवत्येव ॥ कइ। जओ। तओ ॥ पञ्च होंति। पंच पेच्छ। सत्तहिंतो। अट्ठसुंतो। णवसुं। दहसुं। एआरह। वारह। तेरह। चउद्दह। पण्णरह। सोलह। सत्तरह। अट्ठारह ॥ आमि तु पञ्चाणं; सत्ताणं ॥ छएहिं पंचाहिं अच्छराहिं; अट्ठासुं इत्थीसुं इत्यादि वक्ष्यमाणविशेषविधेः ॥

१६. अस्य क्वचिल्लोपः।

स्यात्। रुक्खा पडिअं। ङौ रुक्खे। राही; ह्रस्वोक्त्या दीर्घस्याप्युपलक्षणादीप्रत्यये आलोपः ॥

१७. इदुतोः शस् णो

इदुतोः संबन्धि शस् णो स्यात्। स्त्रीक्लीबयोर्वक्ष्यमाणत्वात्पुंस्येव। अग्गिणो। वाउणो ॥

१८. दीर्घौ ह्रस्वौ स्याताम्

मण्डूकप्लुतिन्यायात्सुपि परे पुंसि च। गामणिणो। सअंभुणो ॥ गामणिस्स। सअंभुस्स ॥



१९. ङसो वा स्यात् ॥

इदुतोः ङसो णो वा स्यात्। अग्गिणो सिहा। वाउणो वेओ। रिउणो ॥ गामणिणो। गामणिस्स ॥ सअंभुणो। सअंभुस्स ॥

२०. जस ओ वो अच्च प्राक्

इदुतोर्जस ओ वो इत्येतौ स्याताम्। प्राक् पूर्वमच्च स्यात्। अग्गओ। अग्गवो ॥ वाअओ। वाअवो ॥ चकारात् णो च। अग्गिणो। वाउणो ॥

२१. टा णा

इदुतोष्टा णा स्यात्। स्त्रियां विशेषस्य वक्ष्यमाणत्वात्पुंक्लीबयोः। अग्गिणा। वाउणा। गामणिणा। सअंभुणा। दहिणा। महुणा ॥

२२. दीर्घः सुभिस्सुप्सु।

एषु परेष्विदुतोर्दीर्घः स्यात्। अग्गी। वाऊ ॥ अग्गीहिं। वाऊहिं ॥ अग्गीसुं। वाऊसुं ॥ णईहिं। मईहिं। तणू। तणूहिं। दहीहिं। महूसुं ॥ ईदूतोरप्येवं रूपाणि ॥

२३. न स्यात्क्वचित्

कइसुं। भूमिसुं ॥ क्लीबे सौ दीर्घो न स्यादेव ॥ दहिं। महुं ॥

२४. स्त्रियां शसुदोतौ

स्याताम्। स्त्रियामिति 'सोर्नपुंसके (प्रा० स० ५।३१)' इति यावत् ॥ मालाउ। मालाओ ॥ णईउ। णईओ ॥

२५. इदुतोश्च दीर्घः स्यात् ॥

सुपि परे। शस उदोतौ च ॥ मईउ। मईओ ॥ तणूउ। तणूओ ॥ मईए। तणूए ॥

२६. जस् वा

जस् उदोतौ वा स्यात् ॥ बालाउ। बालाओ ॥ णईउ। णईओ ॥ मईउ। मईओ ॥ तणूउ। तणूओ ॥ पक्षे बाला, णई, मई, तणू ॥

२७. अमि ह्रस्वः

अमि दीर्घो ह्रस्वः स्यात्। बालं। णइं। बहुं ॥

२८. टाङसिङस्ङीनामिदेददातः स्युः ।
णईइ । णईए । णईअ । णईआ ॥ मईइ । मईए । मईअ । मईआ ॥

२९. नातोऽदातौ
अतष्टादीनामदातौ न स्याताम् । बालाइ । बालाए ॥

३०. आदीतौ बहुलम्
स्त्रियां नाम्न उत्तरे आदीतौ बहुलं स्याताम् ॥ सोहणा । सोहणी ॥ सुप्पणहा । सुप्पणही ॥ राहा । राही ॥ क्वचिदादेव । पिआ । वल्लहा । असहणा । अहणा ॥ माणिणी । माणंसिणी । हलन्तादीदेवेति शाकल्यः ॥

३१. सोर्नपुंसके बिन्दुः ॥
स्यात् । वणं । दहिं । महुं ॥ अमोऽल्लोपेऽपि दहिं, महुं । दहि, महु इति तु संस्कृतासिद्धात् ॥

३२. जश्शसोरिं प्राक्च दीर्घः स्यात्
नपुंसके जश्शसोरिं स्यात् । प्राक्च दीर्घः स्यात् । वणाइं । दहीइं । अच्छीइं । महूइं ॥

३३. अक्ष्णोऽच्छीणि च क्वचित् ।
दृश्यत इति शेषः । यथा वाक्पतिराजस्य—

'उअ कण्णणिहिअकुसुमावअंसरअणङ्कुराइं व गलन्ति ।
विडकामिणीण बहुसो संभरिए जम्मि अच्छीणि ॥'

सप्तशतके च—

'अच्छीणि ता थइस्सं दोहि वि हत्थेहि तम्मि दिट्ठम्मि ।
अङ्गं कलम्बकुसुमं व पुलइअं कहं णु ढक्किस्सं ॥ (गा० स० ४।१४)'

३४. संबुद्धौ सावोत्वदीर्घबिन्दवो न स्युः
हे रुक्ख ॥ हे अग्गि । हे वाउ ॥ हे वण ॥

* संबुद्धावोत्वमिच्छन्ति वाऽदन्तस्य तु पैङ्गलाः ॥
णिक्किवो । णिक्किव ॥

३५. आत एत् ॥
नेति निवृत्तम् । संबुद्धौ सौ परे आत एत्स्यात् । बाले । माले ॥



३६. न स्यात् क्वचित्
हे माउच्छा । हे पिउच्छा । हे अत्ता ॥

३७. ईदूदम्बानां ह्रस्वः
संबुद्धौ सौ परे एषां ह्रस्वः स्यात् । हे णइ । हे वहु । हे अंब ॥

३८. सुपि ऋदारः ।
सुपि परे ऋकार आरः स्यात् । ततोऽदन्तवद्रूपम् । भत्तारो, भत्तारा, भत्तारं, भत्तारे, भत्तारेण, भत्तारेहिं, इत्यादि । संबुद्धौ—हे भत्तार, हे भत्तारा ॥

३९. पित्रादेररः
सुपि परे पित्रादेर्ऋकारः अरः स्यात् । ततोऽदन्तवद्रूपम् ॥ पिअरो । पिअरा ॥ भाअरो । भाअरा ॥ जामाअरो । जामाअरा । माअरा ; बालावद्रूपम् ॥

४०. उद्वा जश्शस्टाङस्ङसिष्वमातुः स्यात् ॥
एषु मातृशब्दवर्जमृकार उद्वा स्यात् ॥ भत्तुणो । भत्तओ ; भत्तवो । भत्तू ॥ एवं पिउणो; पिअओ, पिअवो; पिऊ ॥ पक्षे भत्तारा, पिअरा ॥ शसादावुदन्तवदुदाहार्यम् । मातुस्तु—माआ, माआओ; माअरा, माअराओ ॥

४१. आत्सौ
सौ परे ऋत आद्वा स्यात् ॥ भत्ता । भत्तारो ॥ पिआ । पिअरो ॥ संबुद्धौ—हे भत्ता, हे भत्तार ; हे पिआ, हे पिअर ॥

४२. सुपि मात्रादेः
सुपि मात्रादेर्ऋत आद्वा स्यात् ॥ माआ । माआओ । टाङसिङस्ङिषु माआए इत्यादि ॥ हे माए । हे माअरे ॥ सुपीति सुमात्रानुवृत्तिनिरासार्थम् ॥

४३. ननान्दृयात्रोस्तु नित्यं स्यात् ।
ऋदात्सुपीत्येव । टाङसिङस्ङिषु । णणन्दाए । जाआए । हे णणन्दे । हे जाए ॥

४४. सौ राज्ञोऽतश्च तथा
तथा अत आत्स्यात् । राआ ॥

४५. णो जश्शस्ङसिङसां तु स्यात् ॥

राज्ञ एषां चतुर्णां णो स्यात् । राइणो होन्ति पेच्छ वा । राइणो गहिअं धणं वा ॥

४६. टा णा द्विर्वा जस्य च लोपः स्यात्

राज्ञ इत्येव । द्वित्वपक्षे जस्य च लोपः स्यात् । रण्णा । राइणा ॥

४७. णोरपीत्थमिच्छन्ति ।

इत्थमिति णो द्विर्वा जलोपश्चेति । रण्णो । राइणो ॥

४८. अद्वित्व इत्

द्वित्वाभावपक्षे जस्य इत्स्यात् । राइणा । राइणो ॥

४९. जश्शसोर्णोविधावाच्च

जश्शसोर्णोविधौ सति राज्ञो जस्य आत्स्यात् । अद्वित्व इत्येव । राइणो होंति पेच्छ वा । चकारादिच्च । राइणो ॥

५०. अप्यदन्तता ॥

राज्ञोऽन्त्यहल्लोपे अदन्ततापि स्यादेव ॥ राओ ॥ राआ ॥ राअं ॥ राए ॥ राएण ॥ राएहिं ॥ राआ । राआओ । राआउ । राआहि ॥ राआहिंतो । राआसुंतो ॥ राअस्स ॥ राआणं ॥ राए । राअम्मि ॥ राएसुं ॥ हे राअ ॥ हे राआ ॥

५१. संबुद्धौ सोस्तु बिन्दुर्वा

स्यात् ॥ हे राअं । हे राआ ॥

५२. भवद्भगवतोः सदा ।

अनयोः सोर्बिन्दुः स्यात् । सदेति संबुद्धावसंबुद्धौ च नित्यमेव ॥ भवं भणउ । भअवं ॥ हे भवं । हे भअवं ॥

५३. आत्मादीनामाणः

अत आणः स्यात् ।

आत्मब्रह्मोक्षपूषाध्वमूर्धग्रावयुवादयः ॥

अप्पाणो । मलोपे अत्ताणो ॥ बम्हाणो ॥ उक्खाणो । छत्वे उच्छाणो ॥ पूसाणो ॥ अद्धाणो ॥ मुद्धाणो ॥ गावाणो ॥ जुआणो ॥ वृक्षवद्रूपम् ॥



सर्वसुप्साधारणोऽयं विधिः ॥—'अप्पाणुलंघइं (?) भणसु' ॥

५४. अनित्वद्वित्वं च राजवत्सर्वम् ॥

आत्मादीनामित्वद्वित्ववर्जं सर्वं कार्यं राजन्शब्दवदतिदिश्यते । आणादेशसमुच्चयार्थश्चकारः । अत्ता । अप्पा ॥ अप्पाणो । अत्ताणो ॥ अप्पं ॥ अप्पाणो । अप्पे ॥ अप्पणा ॥ अप्पेहिं ॥ अप्पणो ॥ अप्पाहिंतो । अप्पासुंतो ॥ अप्पणो ॥ अप्पाणं ॥ अप्पे ॥ अप्पेसुं ॥ हे अप्पा । हे अप्पं । हे अप्प ॥ ब्रह्मादयोऽप्येवमुदाहार्याः ॥

५५. सर्वनाम्नो जसः पुंस्येत्

स्यात् । सर्वनाम्न इत्यधिकारः । सव्वे । विस्से ॥

५६. ङेः सिंसम्मित्थाः स्युरस्त्रियाम् ।

सव्वस्सिं । सव्वम्मि । सव्वत्थ ॥ स्त्रियां तु सव्वाए एव ॥

५७. किंयत्तदेतदिदमां ट इणा वा

अस्त्रियामेषां टाया इणा वा स्यात् ॥ किणा । जिणा । तिणा । एइणा । इमिणा । पक्षे केण, जेण, इत्यादि ॥

५८. आम एसिं स्यात् ॥

अस्त्रियामाम एसिं स्याद्वा ॥ केसिं । जेसिं । तेसिं । एएसिं । इमेसिं । पक्षे काणं जाणं इत्यादि ॥

५९. किंयत्तद्भ्यो ङस आसः स्यात्

वेत्येव । अस्त्रियामित्येव ॥ कास । कस्स ॥ जास । जस्स ॥ तास । तस्स ॥

६०. ईप्रत्यये स्सा से ।

ईप्रत्यये सति एभ्य उत्तरस्य ङसः स्सा से इत्युभौ स्याताम् । युक्ते ह्रस्वः ॥ किस्सा । कीसे ॥ जिस्सा । जीसे ॥ तिस्सा । तीसे ॥ पक्षे इदेददातः ॥ कीइ । कीए । कीअ । कीआ ॥ ईप्रत्यय इति किम् । काए । जाए । ताए ॥

६१. त्रिषु ङेर्हिं प्राक्पुंवच्च

त्रिष्वेभ्यो ङेर्हिं स्यात् । स्त्रियां प्राक् पुंवच्च ॥ कहिं रुक्खे वणे णईए वा । पक्षे कस्सिं ; कीए ॥ जहिं । तहिं । जस्सिं । जीए ॥

६२. **आला आहे इआ दार्थे ॥**

कालार्थे विहितदाप्रत्ययसार्थे एभ्यो ङेरेते त्रय आदेशाः स्युः ॥ काला । काहे । कइआ ॥ जाला । जाहे । जइआ ॥ ताला । ताहे । तइआ ॥

६३. **सर्वैकान्येभ्यश्च ङसेर्दो त्तो वाऽच्च दीर्घश्च ।**

सर्वैकान्येभ्यः कियत्तद्भ्यश्च ङसेर्दो त्तो वा स्याताम् । प्राग्दीर्घश्च न स्यात् ॥ सव्वदो । सव्वत्तो ॥ एक्कदो । एक्कत्तो ॥ अण्णदो । अण्णत्तो ॥ कदो । कत्तो ॥ जदो । जत्तो ॥ तदो । तत्तो ॥ पक्षे आदोदुहयः ॥ ङसेरिति पञ्चम्युपलक्षणम्; तेन भ्यसोऽपि दोत्तोप्रभृतय इत्येके ॥

६४. **इदमो दस्य च लुक्स्यादो च**

त्रिषु इदमो ङसेर्दो त्तो स्याताम्; इदमो दस्य च लुक्स्यात् । ङसेरो च स्यात्; इदमो दलुक्च ॥ इदो । इत्तो । इओ ॥ दलोपे इओ इति सिद्धौ ओविधानादन्यत्र दोत्वे दलोपो न स्यात् । तेन सव्वदो, अण्णदो, इत्याद्येव । न तु सव्वओ, अण्णओ, इत्यादि ॥

६५. **तदस्तो च सह**

त्रिषु तदो ङसेरो च स्यात् । ङसिना सह तो च स्यात् ॥ तओ;—'तओ समुच्छसिअहाससुंदेरं' इति गुणपताका । तो;—'तो ते कइमाअंगे (से० ३।१)' इति सेतुः ॥

६६. **ङसा से स्यात् ॥**

त्रिषु ङसा सह तदः से स्यात् । से, तस्य तस्या वा । वानुवृत्तेः तास, तस्स; तासे, तिस्सा, ताए ॥

६७. **आमा णं सिं स्याताम्**

आमा सह तदस्त्रिषु णं सिं वा स्याताम् ॥ णं, सिं, तेषां तासां वा । पक्षे तेणं, ताणं, तीणं वा ॥

६८. **अमृटाभिसि णः**

एषु परेषु त्रिषु तदो णः स्याद्वा । णं भण; तं भण, तां भण, तद्भण वा । णेणं । णाए । णेहिं । णाहिं । पक्षे तं; तेण, ताए; तेहिं, ताहिं ॥



19

६९. **किमः कः स्यात् ।**

वेति निवृत्तम् । त्रिषु सुपि । को रुक्खो । कं वणं । का णारी ।—'किं सीसउ जं ठवेइ वअपरिणामो (से० ४।२३)' इत्यादावव्ययस्य किमः प्रयोगः ॥

७०. **इदम इमः स्यात्**

त्रिषु सुपि । इमो । इमा । इमं । अअं, इअं, इति संस्कृतात् ॥

७१. **अः स्सिंस्सयोर्न वा**

स्सिंस्सयोरिदमोऽकारः स्यान्न वा ॥ अस्सिं । इमस्सिं ॥ अस्स । इमस्स ॥

७२. **दस्य हो ङिना**

ङिना सह इदमो दस्य हः स्यात् ॥ इह । इमस्सिं ॥

७३. **न त्थः ॥**

इदमो ङेः स्थाने त्थो न स्यात् । इह । इमस्सिं । अस्सिं । इमम्मि ॥

७४. **क्लीबे स्वम्भ्यामिदमिणमिणमों**

इदम एते त्रयः स्युः । इदं । इणं । इणमों ॥ वानुवृत्तेः—इमं वणं ॥

७५. **सममेणमेतदोम्टाभ्याम् ।**

अम्टाभ्यां सममेतद एणं स्यात्क्लीबे ॥ एणं पेच्छ । एणं कअं । एइणा, एएण वा ॥

७६. **त्तो पञ्चम्याः**

एतदः पञ्चम्याः स्थाने त्तो स्याद्वा । एत्तो, एतस्मात् एताभ्याम् एतेभ्यः । पक्षे प्रागुक्तकार्याणि ॥

७७. **तलुक् तोत्थे**

तोत्थयोरेतदस्तस्य लुक् स्यात् । एत्तो । एत्थ ॥

७८. **सावक्लीबे तदश्च सः ॥**

अक्लीबे सौ परे तद एतदश्च तस्य सः स्यात् । सो जणो । सा रिद्धी ॥ एसो । एसा ॥ क्लीबे तु तं, एणं ॥

७९. **अदसो मुः**

त्रिषु सुपि परे अदसो मुः स्यात् । अमू पुरिसो । अमू वहु । अमुं वणं । उदन्तवद्रूपाणि । अमुस्सिं । अमुत्थ ॥

८०. **सुना वा ह**

सुना सह अदसो हः स्याद्वा । अह पुरिसो णारी वणं वा ॥

८१. **युष्मदस्तुं तुमं तथा ।**

तथेति त्रिषु सुना सह युष्मदः स्थाने तुं तुमं च स्याताम् । युष्मद इत्यधिकारः ॥ तुं । तुमं ॥

८२. **तं चामा स्यात्**

अमा सह युष्मदस्तं स्यात् । चकारात्तुंतुमौ च । तं, तुं, तुमं, वा त्वाम् ॥

८३. **तुज्झे तुम्हे तु जसा**

जसा सह युष्मदस्तुज्झे तुम्हे स्याताम् । तुज्झे । तुम्हे ॥

८४. **शसा वो च ॥**

शसा सह युष्मदो वो स्यात् । चकारात्तुम्हे तुज्झे च । वो युष्मान् ॥

८५. **टाङिभ्यां तइ तुमए तए तुमे तुमइ**

एते पंच स्युः । त्वया त्वयि वा ॥

८६. **टा तुमाइ भवेत् ।**

टेति सहार्थे तृतीया । अस्य विशेषादिष्टत्वात् तइ इत्यादि पञ्चकं च ॥

८७. **तुज्झेहिं तुम्हेहिं भिसा तु**

भिसा सह स्याताम् ॥

८८. **ङसिना तुमा तुमादो च ॥**

**तत्तो तुमादु च तुमाहि तइत्तो चेति षट् प्रोक्ताः ।**

ङसिना सह ॥

८९. **भ्यसि तुम्ह तुज्झ तुम इति**

भ्यसि परे युष्मदः स्थाने तुम्ह तुज्झ तुम इति त्रयः स्युः ॥

पदादेशशङ्कानिरासाय पद्य एव विवृणोति—

९०. **एषां रूपाण्यदन्तवच्च स्युः ॥**

एषां त्रयाणामादेशानाम् । भ्यसो हिंतो सुंतो आदेशौ अतश्चादेतौ स्यातामित्यर्थः । एवं त्रयाणां प्रत्येकं चत्वारि चत्वारि रूपाणि भवन्ति । तुज्झाहिंतो । तुज्झेहिंतो । तुज्झासुंतो । तुज्झेसुंतो ॥ तुम्हतुमयोरप्येवम् ॥—



'कुविअं च पसाएउं सिक्खाउल्लो तुमाहिंतो (गा० स० ६।२३)' इति सप्तशती ॥ तुज्झादेशमप्यत्र कश्चिदिच्छति । तदन्ये न मन्यन्ते ॥

९१. **तुह तुज्झ तुम्ह तुब्भ तु तव तुम च ङसा**

ङसा सह इमे सप्त स्युः ॥

९२. **टया च ते दे स्तः ।**

चकारात् ङसा सह । ते, दे, त्वया तव वा ॥

९३. **तुज्झाणं तुम्हाणं वो तुम्हामा**

आमा सह एते चत्वारः स्युः ॥

९४. **ङिना तुमम्मि न वा ॥**

ङिना सह तुमम्मि न वा स्यात् । तुमम्मि । पक्षे तइप्रभृतयः ॥

९५. **तुज्झतुम्हौ सुपि स्याताम्**

सुपि परे । अत एत्वम् । तुज्झेसुं । तुम्हेसुं ॥

९६. **शाकल्यस्यात इन्मते ।**

शाकल्यस्य मते अनयोरत एत्वप्राप्तौ इत्स्यात् । तुज्झिसुं । तुम्हिसुं । एतत्तु न बहुसम्मतम् ॥

९७. **सुनाऽस्मदोऽहं अहअं अहम्मि अहमित्यमी ॥**

अस्मद इत्यधिकारः । सुना सह अमी चत्वारः स्युः ॥

९८. **अम्मिरमा च**

अमा सह अस्मदोऽम्मिः स्यात् । चकारात् सुना च । अम्मि, अहं मां वा ॥

९९. **मि चैके**

स्वम्भ्यां सह मि च स्यात् इत्येके । मि, अहं मां वा ॥

१००. **ममं मं**

सुनेति निवृत्तम् । अमा सह ममं मं इत्येतौ स्याताम् । ममं, मं, माम् ॥

१०१. **अम्हे जसा**

सह स्यात् ॥

१०२. **शसा णे च ।**

चकारादम्हे च । णे, अम्हे, अस्मान् ॥

१०३. **टा मे ममाइ**

टया सह मे ममाइ स्याताम् ॥

१०४. **टाङिभ्यां समं मइ मए उभौ ॥**

स्याताम् । उभाविति क्रमशङ्कानिरासार्थम् । मइ, मए, मया मयि वा ॥

१०५. **भिसा णे अम्ह अम्हाणं अम्हे अम्हेहिमित्यमी ।**

पञ्च स्युः ।

१०६. **ङसिना ममादु मत्तो ममाहि ममादो मइत्तो स्युः ॥**

ङसिना सह पञ्च । अत्र द्वितीयपादे एका मात्रा वर्धत इति न वाच्यम् ।—

'जइ दीहो विअ वण्णो लहु जीहा पढइ होइ सो वि लहू ॥ (प्रा०पि० १।५)'

इति श्रीमत्पिङ्गलपादैर्दीर्घस्य लघुत्वातिदेशात् ॥

१०७. **भ्यस्यम्हममौ स्याताम्**

भ्यसि परे अस्मदो अम्ह मम इत्येतौ स्याताम् । हिंतो सुंतो द्वावादेशौ च पूर्ववत् । अम्हाहिंतो । अम्हासुंतो । अम्हेहिंतो । अम्हेसुंतो ॥ ममाहिंतो । ममासुंतो । ममेहिंतो । ममेसुंतो ॥—

'को क्खु अवराहिल्लो चिअ कुप्पइ अण्णो तुमेहिंतो ।
ओरद्धं पि पसाअइ का वा अण्णा ममाहिंतो ॥' इति वाक्पतिराजः ॥

१०८. **अम्हत्तोऽम्हेहिमित्येके ।**

पदादेशोऽयम् ॥

१०९. **मम मे मह मज्झ ङसा**

ङसा सह चत्वारः स्युः ॥

११०. **आमा णेअम्हाणमम्हमम्होम्हाः ॥**

आमा सह एते पञ्च स्युः ॥

१११. **ङिना ममस्सिं ममम्मि स्याताम्**

११२. **अम्हेसु मम्हिसुं ।**

**अम्हासुं स्युः सुपा**

त्रय एव ॥ अत्र केषांचित्पदानां संस्कृतात्सिद्धिं प्राचामनुरोधात् व्याख्याने ग्रन्थविस्तरभयाच्च उपेक्ष्य सूत्राणि कृतानि ॥



११३. **स्वादौ द्वेर्दोः**

त्रिष्वित्येव । स्वादौ परे द्वेर्दोः स्यात् ॥ दोहिं ॥ दोहिंतो । दोसुंतो ॥ दोण्णं ॥ दोसुं ॥ जश्शसोर्वक्ष्यते ॥

११४. **त्रेस्ती**

त्रिषु स्यात् ॥ तीहिं ॥ तीहिंतो । तीसुंतो ॥ तिण्णं ॥ तीसुं ॥ दीर्घनिर्देशात्सुभ्यसाम्सुप्सु कदाचिद्गुणो(?) माभूत् । जश्शसोर्वक्ष्यते ॥

११५. **सजश्शसः ॥**

**तिण्णि स्यात्**

त्रिपु त्रेर्जश्शस्सहितस्य तिण्णि स्यात् । तिण्णि विप्पा बालाओ भूसणाइं वा ॥

११६. **द्वेस्तु दोदोण्णिदुवेवेवेण्णयस्तथा ।**

तथेति जश्शस्भ्यां सहितस्य द्वेरिमे पञ्च स्युः । दो, दोण्णि, दुवे, वे, वेण्णि, सोहन्ति पेच्छ वा ॥

११७. **पदे परे दुः समासे**

समासे पदे परे द्वेर्दुः स्यात् । दुगुणो । दुवेओ ॥

११८. **कुत्रचिद्दोश्च दृश्यते ॥**

'णडालफलअं दोहिण्णचंदुज्जलम् (क० १।३२)' इति राजशेखरः ॥

११९. **चतुरश्चत्तारो चत्तारा चत्तारि चत्तारे ।**

सजश्शस इत्येव । चत्वार आदेशाः ॥

१२०. **अन्यत्र तु चदुः**

जश्शसोरन्यत्र पुनः चतुरश्चदुः स्यात् । चऊहिं । चऊहिंतो । दकारो भाषान्तरार्थः ॥

१२१. **एषामामो ण्णं**

एषां द्वित्रिचतुराम् । दोण्णं । तिण्णं । चउण्णं ॥ द्वित्वानिर्देशोऽत्र पादे शेषादेशयोर्द्वित्वनिषेधज्ञापकः ; रुक्खेण, रुक्खाणं ॥

१२२. **अदन्तवच्छेषः ॥**

शेषः सुब्विधिरदन्तवत् । अग्गीहिं ; दोहिं ; णईहिन्तो ; अग्गिस्स ; वा उम्मि ; इत्यादि ॥

१२३. न ङिङस्योरेदातौ

अदन्तत्वातिदेशात्प्राप्तावनदन्तान्न स्याताम् ॥ अग्गिम्मि । वाउम्मि ॥ अग्गिदो । वाउदो ॥ सावोत्वं भिस्सुपोरेत्वं च विशेषविधिना दीर्घेणैव व्याहतम् ॥

१२४. पञ्चादेर्भिस्सुपोः स्त्रियामाद्वा ।

भिस्सुपोः परयोः पञ्चादेरत आद्वा स्यात् स्त्रियाम् ॥ पंचहिं, पंचाहिं; पंचसुं, पंचासुं, तरुणीसुं; इत्यादि ॥

१२५. षष् छअ

स्यात् । छअ । छआ । छएहिं । छआणं ॥

१२६. भिस्यत एत्

विभक्तिविपरिणामेन षष इति षष्ठ्यन्तमनुवर्तते । भिसि परे षषोऽत एत्स्यात् । छएहिं ॥

१२७. छा भ्यसि

भ्यसि परे षषश्छा स्यात् ॥ छाहिंतो । छासुंतो ॥

१२८. स्त्रियां भिस्सुपोश्च स्यात् ॥

छेत्येव । चकारात् भ्यसि च ॥ छाहिं बालाहिं ॥ छासुं ॥ छाहिंतो । छासुंतो ॥

१२९. द्वित्वे बहुवचनम्

द्वित्वे वाच्ये बहुवचनं स्यात् । प्राकृते द्विवचनं नास्त्येवेति भावः । दो माणुसा द्वौ मानुषौ । उहे मित्तावरुणा ॥

१३०. षष्ठी तु चतुर्थ्याः

चतुर्थ्याः स्थाने षष्ठी स्यात् । णमो हरिणो । साहा अग्गिस्स । सहा पिअराणं । बम्हणाणं देइ ॥

१३१. क्वचिन्न तादर्थ्ये ।

तादर्थ्ये विहितायाः चतुर्थ्याः षष्ठी न स्यात् ।—

'पाणाअ गओ भमरो लब्भइ दुक्खं गइन्देसु ॥'

'सुहाअ रज्जं किर होइ रण्णो' इति मम विलासवतीसट्टके । क्वचिद्-



ग्रहणमबहुत्वार्थम् । रुक्खाणं वल्लीओ । जूवाणं दारूइं ॥

१३२. बहुलमनुस्वारः स्याट्टाम्ङिभिसिंसुप्सु

टा आम् ङि भिस् इं सुप् इत्येतेषु अनुस्वारो बहुलं स्यात् । रुक्खेणं रुक्खेण; अम्हाणं अम्हाण, अम्हं अम्हा, रुक्खाणं रुक्खाण, कईणं कईण; एत्थं एत्थ, रुक्खें रुक्खे, रुक्खम्मिं रुक्खम्मि; रुक्खेहिं रुक्खेहि; रुक्खाइं रुक्खाइ, वणाइं वणाइ; अग्गीसुं, अग्गीसु; इत्यादौ विकल्पः । दहिणा महुणा अग्गिणा अम्हो वो णे इत्यादौ न स्यात् ॥

१३३. विनिमयश्च सुपाम् ।

सुपां विनिमयः परिवर्तश्च बहुलं स्यात् । रत्तिं दिट्ठोसि; रात्रौ । अच्छीसुं पिज्जासि ॥

१३४. वीप्सायां पूर्वपदे भवेद्द्वितीयैकवचनं वा ॥

अङ्गमङ्गाइं । घरंघरेण । वणंवणेहिं । अंगमंगाणं । घरंघरेसुं ॥

इति श्रीमार्कण्डेयकवीन्द्रकृतौ प्राकृतसर्वस्वे भाषाविवेचने महाराष्ट्र्यां सुब्विधिः पञ्चमः पादः ॥ ५ ॥

१. लड् भूतभाविनोर्वा स्यात्

भूतभाविनोः कालयोर्लट् वा स्यात् ॥ होइ; अभवत् बभूव अभूत्। पक्षे होहीअ ॥ होइ भूयात् भविता भविष्यति अभविष्यत्। पक्षे होहिइ ॥

२. अदन्तस्योभयं पदम्।

अदन्तस्य धातोरुभयपदं स्यात्। अविशेषात्कर्तरि भावकर्मणोश्च ॥ पचइ। पचए ॥ वड्ढइ। वड्ढए ॥ ईअइज्जादीनामदन्तत्वात् पढीअइ पढीअए; वन्दिज्जइ वन्दिज्जए, दिज्जइ दिज्जए; खज्जइ खज्जए; पेक्खइ पेक्खए; इत्यादयः ॥

३. परस्मैपदमन्येषाम्

अदन्तानामन्येषाम्। णेइ। देइ। होइ। विकरणस्यानदन्तत्वात् पढहिइ; वड्ढहिइ ॥

४. तेतिङोरेदिणौ स्मृतौ ॥

पढए। पढइ ॥ वड्ढए। वड्ढइ ॥ 'प्रायः कग (प्रा० स० २।२)' इत्यादिना तलोपेनैव सिद्धयति; किमनेन सूत्रेणेति न वाच्यम्। तस्य प्रायिकत्वात् पढदि पढदे इत्याद्यनिष्टसिद्धेः। नाटकेषु तथा दृश्यत इति चेत्; महाराष्ट्रीतरासु भाषासु तथा सिद्धेर्न विरुद्धम्। राजशेखरस्य महाराष्ट्रीप्रयोज्येषु श्लोकेष्वपि दृश्यत इति चेत्; तस्यैवाविमृश्यकारित्वम्; नापराधोऽनुशासनानाम् ॥

५. एर्मिः

स्यात्। वड्ढामि। सेसिङोस्तु कार्यान्तराभावात् पढसि पढसे; वड्ढसि वड्ढसे ॥ मण्णे जाणे इति तु संस्कृतात् ॥

६. लटि मिङ इल्लुग्वा

स्यात्। पढं। हसं। मो बिन्दुः। पक्षे पढामि हसामि ॥ लटीति किम्। काहिमि ॥



७. प्रायेणात एदिदातः स्युः।

धातोर्विकरणस्य वा अतः स्थाने ॥ प्रायेणेति वचनात् तिङ्सिङोरादेतौ वा। भणइ भणाइ भणेइ, भणसि भणासि भणेसि; अन्त्यन्त्वन्तेसेइत्थादेशेषु निषेध एव, भणन्ति, भणन्तु, भणन्ते, भणसे, भणित्था; हादेशे उत्तमे च त्रयोऽपि वा, भणह भणेह भणाह भणिह; हसमि हसामि हसेमि हसिमि, पढमो पढेमो पढिमो पढामो; क्तक्तवत्वोरिदेव, भणिअं भणिअवंतो; क्त्वातुंतव्येष्वेदितावेव, भणिऊण भणेऊण, हसिउं हसेउं, पढिअव्वं पढेअव्वं ॥

८. भूम्नि न्ति,हइत्था,मोमुमाः

भूम्नि बहुत्वे अर्थात् त्रयाणां पुरुषाणां एकद्वित्रिक्रमादेते आदेशाः स्युः। प्रथमस्य होन्ति, पढन्ति। मध्यमस्य होह होइत्था, पढह पढित्था। उत्तमस्य होमो होमु होम, पढामो पढामु पढाम ॥

९. अतोऽन्ते तु वा प्रथमे ॥

अत उत्तरे प्रथमपुरुषे बहुत्वेऽन्ते वा स्यात् ॥ तुवरन्ते। तुवरन्ति ॥

१०. यक ईअ इज्ज इत्येतौ

स्याताम् ॥ पढीअइ ॥ पढिज्जइ ॥

११. अस्तेः सिः सिङा

सिङा सहास्तेः सिः स्यात्। सि असि ॥

१२. मिङाऽम्हि म्हि।

मिङा सहास्तेरम्हि म्हि इत्येतौ स्याताम्। अम्हि, म्हि, अस्मि ॥

१३. अम्हो म्होऽम्ह म्ह मसा

मसा सहास्ते रमी चत्वारः स्युः। अम्हो, म्हो, अम्ह, म्ह, स्मः ॥

१४. त्थ थताभ्याम्

लड्लोटोर्मध्यमस्य बहुवचनाभ्यां सह अस्तेर्द्वित्वापन्नथः स्यात्। त्थ स्थ स्त वा।—

'धरणिभरणे भुअ च्चिअ महण्म्मि सुरासुरा खआम्मि समुद्दा।
हन्तव्वम्मि दहमुहे एण्हि तुम्हे त्थ महुमहस्स सहाआ ॥
(से० ३।३)' इति सेतुः ॥

अत्थि अत्थु इति संस्कृतात् ॥

१५. **भूत आसि आहेसि ॥**

अविशेषात्सर्वेषु पुरुषेषु वचनेषु च भूतकाले अस्तेरिमावादेशौ स्याताम् । आसि ; आसीत् आसन् आसीः आस्त आसं आस्म वा । एवम् आहेसि ॥

१६. **अकास्यकासमौ स्यातां स्थानेऽकार्षीदकार्षमोः ।**

पदादेशोऽयम् । अकासि । अकासं ॥

१७. **शतृशानयोर्न्तमाणौ**

स्याताम् । पढन्तो । पढमाणो ॥

१८. **लृङ्ङर्थे वा**

क्रियातिपत्तिर्लृङ्ङर्थः । तस्मिन् शतृशानयोर्न्तमाणौ स्याताम् । जइ पढन्तो ता पण्डिदो होन्तो । जइ भुञ्जमाणो ता थिप्पमाणो ॥

१९. **अत एव माणः स्यात् ।**

नियमसूत्रमिदम् । अत उत्तरमेव माणः स्यात् । पढमाणो । कुणमाणो ॥ अनतस्तु होंतो देंतो ॥

२०. **ईच स्त्रियाम्**

स्त्रियां शतृशानयोः स्थाने ईत्स्यात् । पढई । वड्ढई । चकारात्—पढन्ती पढमाणा पढमाणी ॥

२१. **भविष्यति हिः**

भविष्यच्छब्दो भविष्यत्कालविहितप्रत्ययोपलक्षणार्थः । तेन लृङ्-लुट्-लट्-लिङ्षु परेषु धातोर्हिर्विकरणः स्यात् । होहिइ ; भूयात् भविता भविष्यति अभविष्यत् ।—'लङ् भूतभाविनोर्वा स्यात् (प्रा० स० ६।१)' इति तिङादयः । होहिन्ति भूयासुः भवितारः भविष्यन्ति अभविष्यन् । एवं मध्यमोत्तमयोः ॥

२२. **स्स च**

भविष्यति स्सश्च विकरणः स्यात् । होस्सइ । पढिस्सइ ॥

२३. **शतृशानयोर्लुग्वा ॥**

शतृशानयोः परयोः स्सस्य लुग्वा स्यात् ॥ होस्संतो । होन्तो ॥ पढिस्स-



८. प्रायो लुक्कगचजतदपयवाम्
९. नातपः ।
१०. यश्रुतिरः
११. कामुकयमुनाचामुण्डातिमुक्तके मो ङ्लुक् ॥ २८ ॥
१२. खोऽपुष्पकुब्जकर्परकीले कोः
१३. छागश्रृङ्खलकिराते। लक्चम्
१४. वैकादौ गः
१५. खोः कन्दुकमरकतमदकले ॥ २९ ॥
१६. पुन्नागभागिनीचन्द्रिकासु मः
१७. शीकरे तु भहौ ।
१८. ऊत्वे दुर्भगसुभगे वः
१९. निकषस्फटिकचिकुरे हः ॥ ३० ॥
२०. खघथधभाम्
२१. धः पृथकि तु
२२. चोः खचितपिशाचयोः सल्लौ ।
२३. झो जटिले
२४. टोर्बडिशादौ लः
२५. स्फटिके
२६. लरङ्कोठे ॥ ३१ ॥
२७. ढः कैटभशकटसटे
२८. ठः
२९. पिठरे हस्तु रश्च डः
३०. लल् डो । ऽनुड्डगे
३१. टोडः
३२. वेतस इति तोः
३३. प्रतिगेऽप्रतीपगे
३४. दंशदहोः ॥ ३२ ॥
३५. दम्भदरदर्भगर्दभदष्टदशनदग्धदाहदोहददोला । दण्डकदने तु
३६. तुच्छे चच्छौ
३७. टल् त्रसरवृन्ततूबरतगरे ॥ ३३ ॥
३८. हः कातरककुदावितस्तिमातुलिङ्गेषु
३९. वसातिभरते वा ।
४०. लो निम्बपलितयोः
४१. दोहदप्रदीप्शातवाहनातस्याम् ॥ ३४ ॥
४२. रल् सप्तत्यादौ
४३. अद्रुमे कदल्याम्
४४. कदर्थिते खोर्वः ।
४५. पीते ले वा
४६. डो दीपे
४७. ढः पृथिव्यौषधनिशी-

थे ॥ ३५ ॥
४८. प्रथमशिथिलमेथिशिथिर निषधेषु
४९. र्णौ दिना रुदिते ।
५०. णो वाऽतिमुक्तके
५१. गर्भिते
५२. नः
५३. आदेस्तु
५४. नापिते ण्हः
५५. पो वः ॥ ३६ ॥
५६. फः पाटिपरिघपारिखापरुषपनसपारिभद्रेषु ।
५७. नीपापीडे मो वा
५८. ल्ल् पापर्धौ
५९. प्रभूते वः ॥ ३७ ॥
६०. फस्य भहौ वा
६१. बो वः
६२. ङ्वयौ कबन्धे
६३. बिसिन्यां भः ।
६४. वो भस्य कैटभे
६५. त्वभिमन्यौ मः
६६. मन्मथे
६७. तु ढो विषमे ॥ ३८ ॥
६८. यो जर्तीयानीयोत्तरीय कृद्येषु
६९. इन्मयटि ।
७०. छायायां होऽकान्तौ
७१. यष्ट्यां लल्
७२. कतिपये वहशौ ॥३९॥
७३. अर्थपरे तो युष्मदि
७४. आदेर्जः
७५. भ्यौ बृहस्पतौ तु बहोः ।
७६. रो डा पर्याणे
७७. लो जठरवठरनिष्ठुरे
७८. हरिद्रादौ ॥ ४० ॥
७९. किरिभेरे डः
८०. खोः करवीरे णः
८१. लो ललाटे च ।
८२. लोहललाङ्गललाङ्गूले वा
८३. स्थूले रलतश्चौत् ॥४१॥
८४. बो मः शबरे
८५. नीवीस्वप्ने वा
८६. ह्रस्व घो बिन्दोः ।
८७. शोः सल्
८८. प्रत्यूषदिवसदशपाषाणे तु हः
८९. स्नुषायां ण्हः फोः ॥४२॥
९०. छल् षट्छमीसुधाशाबससप्तपर्णे
९१. सिरायां वा ।
९२. लुक्पादपीठपादपतनदुर्गादेव्युदुम्बरेऽचान्तर्दः ॥ ४३ ॥
९३. व्याकरणप्राकारागते कगोः



९४. एवमेवदेवकुल।प्रावारकयावज्जीवितावटावर्तमानतावति वः ॥ ४४ ॥
९५. ज्योर्दनुजराजकुलभोजनकालायसाकिसलयहृदयेषु ।
९६. अपतौ घरो गृहस्य
९७. श्रीभगिनीदुहितृवनिताना ॥ ४५ ॥ मिती बहिणीधूआविलआः
९८. उभयाधसोरवहहेट्ठौ ।
९९. मलिनधृतिपूर्ववैदूर्याणां मइलदिहीपुरिमवेरुलिआः ॥ ४६ ॥
१००. स्मरकट्वोरीसरकारौ
१०१. बाहिंबाहिरौ बहिसः ।
१०२. कूरो गौणेषदः
१०३. इण्हि एत्ताहे इदानीमः ॥ ४७ ॥
१०४. तिर्यक्पदातिशुक्तेस्तिरिच्छिपाइक्कसिप्पि
१०५. गोणाद्याः ।

इति प्रथमाध्यायस्य तृतीयः पादः ॥

---

१. स्तोः
२. वा रक्ते गः
३. शुल्के ङ्गः
४. कः शक्तमुक्तदष्टमृदुत्व ॥ ४८ ॥ रुग्णेषु
५. क्ष्वेटकगे खल्
६. ष्कस्कोर्नाम्नि
७. वृश्च रुर्वृक्षे।
८. क्षः
९. स्थाणावहरे
१०. स्कन्दतीक्ष्णशुष्के तु खोः
११. स्तम्भे ॥ ४९ ॥
१२. स्थोऽस्पन्दे
१३. स्त्यानचतुर्थे च तु ठः
१४. ष्टः
१५. विसंस्थुलास्थ्यधनार्थे ।
१६. चः कृत्तिचत्वरे
१७. त्योऽचैत्ये
१८. श्चेर्वृश्चिके ञ्चुर्वा ॥०५॥
१९. उत्सवऋक्षोत्सुकसामर्थ्ये छो वा
२०. क्षमायां कौ ।
२१. क्षण उत्सवे
२२. स्पृहादौ

२३. ध्यश्चत्सप्सामनिश्चले
२४. ध्यय्यर्यां ॥ ५१ ॥ जः
२५. त्वभिमन्यौ जर्जौ
२६. ध्यह्योर्झल्
२७. साध्वसे
२८. ध्वजे वा।
२९. इन्धौ ।
३०. र्तस्याधूर्तादौ टः
३१. प्रवृत्तसंदष्टमृत्तिवृत्तेष्टा ॥
    ५२ ॥ पत्तनकद
    र्थितोष्ट्रे
३२. वा न्तन्धौ मन्युचिह्नयोः
३३. डल्फो । र्मार्दितविच्छर्द-
    च्छर्दिकपर्दवितार्दिग-
    र्तसम्मर्दे ॥ ५३ ॥
३४. ढोऽर्धर्द्धिश्रद्धामूर्ध्नि तु
३५. दग्धविदग्धवृद्धिदंष्ट्रावृ-
    द्धे ।
३६. पञ्चदशदत्तपञ्चाशति णः
३७. ज्ञञ्चोः
३८. स्तवे थो वा ॥ ५४ ॥
३९. रो हश्चोत्साहे
४०. स्तः
४१. पर्यस्ते टश्च
४२. वात्मभस्मनि पः ।
४३. ट्मक्मोः
४४. ष्पस्पोः फः
४५. भीष्मे
४६. श्लेष्मबृहस्पतौ तु फोः
४७. ग्मो मः
४८. न्मः ॥ ५५ ॥
४९. ताम्राम्रयोर्म्बः
५०. ऊर्ध्वे भो वा
५१. ह्वः
५२. वश्च विह्वले
५३. काश्मीरे । म्भः
५४. लो वार्द्रे
५५. र्यः सौकुमार्यपर्यस्तपर्या-
    णे ॥ ५६ ॥
५६. अर रीअ रिज्जमाश्चर्ये
५७. डेरो ब्रह्मचर्यसौन्दर्ये च ।
५८. वा पर्यन्ते
५९. धैर्ये रः
६०. तूर्यदशार्हशौण्डीर्ये
    ॥ ५७ ॥
६१. बाष्पे होऽश्रुणि
६२. कार्षापणे
६३. न वा तीर्थदुःखदक्षिण-
    दीर्घे ।
६४. कूश्माण्ड्यां ण्डश्च तु लः
६५. त्वथ्वद्व्ध्वां क्वचिच्चछ-
    जझाः
६६. ह्लोल्हः ॥ ५८ ॥
६७. श्मष्मस्मह्मामस्मररश्मौ

GRANTHA PRADARSANI.

—:o:—

This Monthly Magazine consists of very rare and valuable ancient oriental works, on Vedic Literature, Hindu Philosophy, different sciences, general literature &c. that have never been published either in India or Europe. The Monthly issue of this Magazine dealing with one subject contains 32 Pages of Demy octavo size printed neetly in beautiful types on good thick paper, after being carefully corrected.

RATES OF SUBSCRIPTION.

| | | |
|---|---|---|
| Annual subscridtion payable strictly in advance for foreign including postage. ... ... ... | 5 shillings. | |
| Do. Do for India, Berma & Ceylon. ... | Rs 3 | 6 |
| Single copy ... ... ... ... ... | „ 0 | 6 |

RATES OF ADVERTISEMENTS.

| | | |
|---|---|---|
| Full page per month. ... ... ... ... ... | „ 3 | 0 |
| Half page per month. ... ... ... ... ... | „ 2 | 0 |

SPECIAL RATES ON CONTRACT.

All communications should be addressed and remittance made to

Arsha Press, Vizagapatam. } S. P. V. RANGANATHASVAMI ARYAVARAGURU. *EDITOR & PUBLISHER.*

Encl to Sol CNo 1334 8-5-12

FEBRUARY, 1912.

# ग्रन्थप्रदर्शनी

SECRETARIAT LIBRARY 20 MAR 1912

नाम

नानाविधप्राचीनापूर्वमहाग्रन्थानां संग्रहः

# Grantha Pradarsani

A

COLLECTION OF RARE AND ANCIENT ORIENTAL WORKS

EDITED AND PUBLISHED BY

**S. P. V. Ranganathasvami Aryavaraguru,**

*Grandson & grateful Pupil of Mahamahopadhyaya*

*Sri Paravastu Venkata Rangacharya Aryavaraguru.*

**34**

PRINTED BY G. R. KRISHNA MURTY,

**at the ARSHA Press, Vizagapatam.**

**1912**

Agent:— Otto Harrassowitz, Leipzig.

*REGISTERED ACCORDING TO ACT XXV. OF 1867*

LOCAL & MUNICIPAL SECRETARIAT 7 MAY 1912

**CONTENTS**

| | |
|---|---|
| 1. *Prákritasarvasva of Márkandéya Kavíndra* | Pages. |
| *by* Bhattanatha Svamin | 1—28 |
| 2. *Aphorisms of Jaina Prákrita Grammar of* | |
| *Trivikrama* by the Editor. | 1— 4 |

# प्राकृतसर्वस्वम् ।

शशिखण्डमौलि साशिखण्डमौलि वा
सितमेघचारु शितिमेघचारु वा ।
उमया विलासि रमया विलासि वा
मम किञ्चिदस्तु ह्रदि वस्तु सन्ततम् ॥
यत्कान्तिपीयूषरसप्रवाहा निध्यायतां चेतसि संप्रविश्य ।
बहिर्महाकाव्यतया स्फुरन्ति वाग्देवता सा मयि संनिधत्ताम् ॥
शाकल्यभरतकोहलवररुचिभामहवसन्तराजाद्यैः ।
प्रोक्तान् ग्रन्थान्नानालक्ष्याणि च निपुणमालोक्य ॥
आव्याकीर्णं विशदं सारं स्वल्पाक्षरग्रथितपद्यम् ।
मार्कण्डेयकवीन्द्रः प्राकृतसर्वस्वमारभते ॥

१. **प्रकृतिः संस्कृतं तत्र भवं प्राकृतमुच्यते ।**

२. **तद्भवं तत्समं चेति द्वेधा**

तद्भवं तत्र संस्कृते भवं लक्षणवशाद्रूपान्तरप्राप्तम् रुक्खघरपेरन्तादि । तत्समं तरलतरङ्गमन्थरादि ॥

३. **देश्यं च केचन ॥**

लक्षणैरसिद्धं तत्तद्देशप्रसिद्धं महाकविप्रयुक्तं लडहपेट्टतोक्खादि । यदाह भोजदेवः—

‘देशे देशे नरेन्द्राणां जनानां च स्वके स्वके ।
भङ्ग्या प्रवर्तते यस्मात्तस्माद्देश्यं निगद्यते ॥’ इति ॥

४. **तच्च भाषाविभाषाऽपभ्रंशपैशाचभेदतः ।**
**चतुर्विधं, तत्र भाषा विभाषाः पञ्चधा पृथक् ।**

अपभ्रंशास्त्रयस्तिस्रः पैशाच्यश्चेति षोडश ॥

भाषा इति शेषः ॥

ननु—

'महाराष्ट्री तथावन्ती शौरसेन्यर्धमागधी ।
बाह्लीकी मागधी प्राच्येत्यष्टौ ता दाक्षिणात्यया ॥
शकाराभीरचाण्डालशबरद्राविडौढ्जा ।
हीना वनेचराणां च विभाषा नाटकाश्रया ॥
व्राचडो लाटवैदर्भावुपनागरनागरौ ।
बार्बरावन्त्यपाञ्चालटाक्कमालवकैकयाः ॥
गौडौढ्रवैवपाश्चात्त्यपाण्ड्यकौन्तलसैंहलाः ।
कालिङ्गचप्राच्यकार्णाटकाञ्च्यद्राविडगौर्जराः ॥
आभीरो मध्यदेशीयः सूक्ष्मभेदव्यवस्थिताः ।
सप्तविंशत्यपभ्रंशा वैतालादिप्रभेदतः ॥
काञ्चीदेशीयपाण्ड्ये च पाञ्चालं गौडमागधम् ।
व्राचडं दाक्षिणात्यं च शौरसेनं च कैकयम् ।
शाबरं द्राविडं चैव एकादश पिशाचजाः ॥'

इति वदन्ति, तत् कथमुच्यते मिलित्वा षोडशेति । तत्राह—

५. महाराष्ट्री शौरसेनी प्राच्याऽवन्ती च मागधी ।
इति पञ्चविधा भाषा युक्ता न पुनरष्टधा ॥

तेनैव—'शौरसेन्या अदूरत्वे मागध्येवार्धमागधी' इत्युक्तत्वात्, दाक्षिणात्यायाश्च लक्षणाकरणात्, बाह्लीक्याश्च रेफस्य लत्वमात्रेण भेदात्, आवन्त्यामेवान्तर्भावादिति भावः । रेफस्य लत्वमपि लक्षणमस्त्येवेति चेत्, संस्कृतेऽपि केषां चिद्रलयोरैक्यस्मरणमिति न दोषः ॥

६. शाकारी चैव चाण्डाली शाबर्याभीरिका तथा ।
टाक्कीति युक्ताः पञ्चैव विभाषा न तु षड्विधाः ॥

ओढ्र्यास्तु ओढ्रदेशभाषानुगामिन्यां शाबर्यामेवान्तर्भावादिति भावः । ननु कथं द्राविडीमप्यपास्य टाक्कीप्रतिपाद्यते । तेनापि टाक्कीं प्रतिपाद्य—



'टक्कदेशीयभाषायां दृश्यते द्राविडी तथा ।
अत्रैवायं विशेषोऽस्ति द्रविडेनादृता परम् ॥'

इति टाक्क्यामेव द्राविड्या अन्तर्भावस्य उक्तत्वाट्टाक्कीप्रतिपादनमेव न्यायः ॥

७. नागरो व्राचडश्चोपनागरश्चेति ते त्रयः ।
अपभ्रंशाः परे सूक्ष्मभेदत्वान्न पृथङ्मताः ॥

एषु त्रिष्वन्येषामन्तर्भावं तत्रैव वक्ष्यामः ॥

८. कैकेयं शौरसेनं च पाञ्चालमिति च त्रिधा ।
पैशाच्यो नागरा यस्मात्तेनाप्यन्या न लक्षिताः ॥

तथा च स एवाह—'अपरे लोकतः ॥ अवधारणीया इत्यर्थः । सूक्ष्मभेदत्वात्तेषां भेदः वक्तुं न शक्यते । तथा—

इक्षुक्षीरघृतादीनां माधुर्यस्यान्तरं महत् ।
तथापि नैतदाख्यातुं सरस्वत्याऽपि शक्यते ॥' इति ॥

९. अतः षोडशधाभिन्नभाषालक्ष्म प्रचक्ष्महे ।
वेद्या विदग्धैरपरास्तत्तद्देशानुसारतः ॥

तत्र सर्वभाषोपयोगित्वात्प्रथमं महाराष्ट्री भाषाऽनुशिष्यते । यथाह परमाचार्यो दण्डी—

'महाराष्ट्राश्रयां भाषां प्रकृष्टं प्राकृतं विदुः ।
सागरः सूक्तिरत्नानां सेतुबन्धादि यन्मयम् ॥' (का० १।३४) इति ॥

१. सिद्धं पाणिन्यादेः

पाणिन्यादिमतसिद्धं धातुनामलिङ्गकारकविभक्तिवचनकृत्तद्धितसमासादिकं सर्वमङ्गीक्रियते । यदाह परमर्षिर्भरतः—'धातुप्रातिपदिककृत्तद्धितसुप्तिङ्समासादीनां तेऽर्थास्ताश्च विभक्तयः । परिणतिरिह परमन्या' इति ॥

२. आदेरतः

आदेरित्या पादसमाप्तेरधिकारः । अत इति यथासूत्रं (प्रा० स० १।१३) यावत् ॥

३. आत्र वा समृद्ध्यादौ ।

समृद्ध्यादावादेरत आन्न वा स्यात् ।

समृद्धिः प्रतिसिद्धिश्च प्रसिद्धिः प्रकटं तथा ।
प्रसुप्तं च प्रतिस्पर्धी मनस्वी प्रतिपत्तथा ।
अभियातिः सदृक्षं च समृद्ध्यादिरयं गणः ॥

सामिद्धी । समिद्धी ॥ पाडिसिद्धी । पडिसिद्धी ॥ पासिद्धी । पसिद्धी ॥ पाअडम् । पअडम् ॥ पासुत्तम् । पसुत्तम् ॥ पाडिप्फद्धी । पडिप्फद्धी ॥ माणंसी । मणंसी ॥ पाडिवआ । पडिवआ ॥ आहिआई । अहिआई ॥ सारिच्छम् । सरिच्छम् ॥ लिङ्गविशिष्टग्रहणात् पाअडो माणंसिणी इत्यादि ॥

४. **स्वप्नेषत्पक्वाङ्गारमृदङ्गव्यजनवेतसेष्वित् स्यात् ॥**

आदेरत इत्येव । वेति निवृत्तम् । सिविणो । ईसि । पिक्कम् । इङ्गालो । मुइङ्गो । विअणम् । वेडिसो ॥

५. **प्रथमे प्रथयोर्युगपत् क्रमेण वोद्भवति**

अत इत्येव । पुढुमम् । पुढमम् । पढुमम् ॥

६. **लुगरण्ये ।**

अरण्ये आदेरतो लुक्स्यात् । वेति निवृत्तम् । रण्णम् ॥

७. **एच्छय्यादौ**

शय्यादावादेरत एत्स्यात् ।

शय्यासौन्दर्यपर्यन्तग्राह्याश्चर्यास्त्रयोदश ।
वल्लीवृन्तोत्कराद्याश्च शय्यादिरिति कीर्तितः ॥

सेज्जा । सुन्देरम् । पेरन्तो । गेज्झम् ।—'पीणत्तणदुग्गेज्झम् (से० १।३)' इति सेतुः । अच्छेरम् । तेरह । वेल्ली । वेण्टम् । ऋतोऽत्वे एत् । विण्टमिति कश्चित् । उक्केरो ॥

८. **बदरे देनौत्**

बदरे देन सहादेरत ओत्स्यात् । बोरम् । बोरी ॥

९. **लवणस्य वेन समम् ॥**

वेन समं लवणस्यादेरत ओत्स्यात् । लोणम् । भट्टिभाषासमावेशे—'आरीणं लवणजलम् (भ० १३।४)' इति शौरसेनीसमावेशे ॥



१०. **लावण्यस्य विकल्पेन**

वेन सममादेरत ओत्स्यात् । ह्रस्वोक्त्या दीर्घोपलक्षणम् ॥ लोण्णं । लाअण्णं ॥

११. **य्वा मयूरमयूखयोः ।**

**स्यात्**

अनयोर्यूकारेण सह आदेरत ओद्वा स्यात् ॥ मोरो । मऊरो ॥ मोहो । मऊहो ॥

१२. **चतुर्थीचतुर्दश्योस्तुना**

अनयोस्तुना सहादेरत ओत्स्याद्वा । चोत्थी । चउत्थी ॥ चोद्दही । चउद्दही ॥ स्त्रीलिङ्गग्रहणादन्यत्र चउत्थो चउद्दहो ॥

१३. **अदातो यथादिषु ॥**

आदेरत इति निवृत्तम् । वेत्येव । यथादिष्वातोऽद्वा स्यात् ।

यथा तथा तालवृन्तप्राकृतोत्खातचामराः ।
चाटुप्रवाहप्रस्तावप्रहारा हालिकस्तथा ।
मार्जारश्च कुमारश्च मरालः खादितादयः ॥

जह । तह । तलवेण्टं । पउअं । [उक्खअं ।] चमरं । चडु । पवहो । पत्थवो । पहरो । हलिओ । मज्जरो । कुमरो । मरलो । खइअं । पक्षे जहा । तहा । तालवेण्टं इत्यादि ॥

१४. **इत्सदि**

सदाशब्दे आत इत्स्यात् । सइ ॥

१५. **पिण्डादिष्वेत्**

इदित्यनुवर्तते । पिण्डादिष्विदेत्स्यात् ।

स्युः पिण्डपिष्टसिन्दूरविष्णुधम्मिल्लविष्टिबिल्वाद्याः ॥

पेण्डं । पेट्ठं । सेन्दूरं । वेण्हू । धम्मेल्लो । वेट्ठी । बेलं । वानुवृत्तिरत्रेति केचित् । आदिना व्यवस्थितविभाषया किंशुके केसुओ ॥

१६. **अत्पथिपृथिवीहरिद्रासु ।**

आस्विदत्स्यात् । पहो । पुहई । हलद्दा ॥

१७. **वाक्यादिस्थस्येतस्तेरित्थम्**

इत्थमिति तेरत्स्यात् ।—'इअ पहसिअकुमुअसरे (से० १।३४)' । अवाक्यादिस्थस्य तु भमरोत्ति कइपहुमतक्को ।

१८. **उदिक्षुवृश्चिकयोः ॥**

अनयोरिदुत्स्यात् । उच्छू । विञ्छुओ ॥

१९. **ओच्च द्विधाकृञि**

द्विधेति लुप्तसप्तम्यन्तम् । कृञि परे द्विधाशब्दे इदोत्स्यात् । चकारादुच्च । दोहाइअं । दुहाइअं । प्रादुरादिवद्धातुना सह ऐकपद्यवद्भावाच्चानादित्वम् ॥

२०. **ई सिंहजिह्वयोः**

अनयोरिदीत्स्यात् । सीहो । जीहा ॥

२१. **ईत इद्गृहीतादौ ।**

गृहीतादावीत इत्स्यात् ।

गृहीतव्रीडितालीकद्वितीयकतृतीयकम् ।
गभीरानीतपानीयकरीषादिरयं गणः ॥

गहिअं । विलिओ । अलिओ । दुइओ । तइओ । गहिरो । आणिअं । पाणिअं । करिसं ॥ अत्र केचिदनाङुपपदस्य नीतस्य विकल्पमिच्छन्ति ॥ उअणिओ । उअणीओ ।—'सीआ रक्खसवसहिं दिट्ठिविसघरं विसोसहि व्व उअणिआ (से० ५।६३)' इति सेतुः । अत्र दीर्घत्वं चेन्मात्राधिक्ये छन्दोभङ्गः ॥

२२. **जीवेर्वा स्यात्**

जीवधातोरीत इद्वा स्यात् । जिअइ । जीअइ ॥

२३. **कीदृशनीडापीडेदृशानामेत् ॥**

एषामीत एत्स्यात् । केरिसो । नेड्डम् । आमेलो । एरिसो ॥

२४. **तुण्डादेरुत ओत्स्यात्**

तुण्डकुट्टिमताम्बूलमुक्तापुष्करपुस्तकम् ।
तथा लुब्धककुद्दालकुम्भीकुन्तलमुद्गराः ॥

तोण्डं । कोट्टिमं । तम्बोलं । मोत्ता । पोक्खरं । पोत्थअं । लोद्धओ । कोद्दालो । कोम्भी । कोन्तलो । मोग्गरो ॥



२५. **उडूखले ड्वा न वा**

उडूखले ड्वा सह उत ओत्स्यान्न वा । ओहलो । ऊडूहलो । ओक्खलो ; सेवादित्वात् द्वित्वम् । डलयोरैक्यादुलूखलेऽप्येवम् ॥

२६. **अन्मुकुटतुल्ये ।**

आदेरित्येव । मुकुटतुल्ये आदेरुतोऽत्स्यात् ।

मुकुटयुधिष्ठिरगुर्वीकर्बुरमुकुरगुरुकसौकुमार्याद्याः ॥

मउडं । जहिट्ठिलो । गरुई । कब्बुरं । मउरं । गरुअं । सोअमल्लं ॥

२७. **उपरेर्वा**

उपरिशब्दस्योतोऽद्वा स्यात् । अवरि । उवरि ॥

२८. **इत्पुरुषे रोः**

पुरुषे रुकारस्य उत इत्स्यात् । पुरिसो । एकदेशविकृतमनन्यवदिति पउरिसं ॥

२९. **से दुर ऊत्**

से परे दुर उत ऊत्स्यात् । दूसहो । दूसीलो । स इति किम् । दुग्गमो । दुक्करो ॥

३०. **ऊत उन्मधूकस्य ॥**

मधूकस्य ऊत उत्स्यात । महुअं ॥

३१. **अद्वा दुकूले लश्च द्विः**

दुकूले ऊतोऽद्वा स्यात् ; तत्संनियोगाल्लश्च द्विः स्यात् । दुअल्लं । दुऊलं ॥

३२. **एन्नूपुरे**

नूपुरे ऊत एत्स्यात् । णेउरो ॥

३३. **ऋतोऽद्भवेत् ।**

आदेर्ऋकारस्याकारो भवति । तणं । घणं । मअं । कअं । वद्धो । वसहो ॥

३४. **इदृष्यादौ**

ऋष्यादावृत इत्स्यात् ।

ऋषिः कृपा कृतिः कृत्या कृपाणः कृपणो वृषः ।
शृगालः पृथुलो गृध्रो मृगाङ्को मसृणं कृषिः ॥

श्टङ्गारभृङ्गभृङ्गारवृष्टिबृंहितवृश्चिकाः ।
वितृष्णो हृदयं गृष्टिः सृष्टिर्दृष्टिस्तथाऽपरे ॥

इसी । किवा । किई । कित्ता । किवाणो । किवणो ; किविणो दाढादित्वात् । विसो । सिआलो । पिहुलो । गिद्धो । मिअङ्को । मसिणं । किसी । सिङ्गारो । भिङ्गो । भिङ्गारो । विठ्ठी । बिहिअं ; मांसादित्वादनुस्वारलुक् । विञ्छुओ । विइण्णो । हिअअं । गिठ्ठी । सिठ्ठी । दिठ्ठी ॥

३५. उदृत्वादौ

ऋत्वादावृत उत्स्यात् ।

ऋतुर्मृदङ्गो निभृतं वृतं परभृतो मृतः ।
प्रावृड्वृती तथा वृत्तवृत्तिभ्रातृकमातृकाः ।
मृणालपृथिवीबृन्दावनजामातृकादयः ॥

उदू । मुइङ्गो । णिहुअं । वुदम् ; आवुदं ; विवुदो ; संवुदो ; णिव्वुदो । परहुओ । मुओ । पाउसो ;—'दिक्प्रावृषोः सः स्यात् (प्रा० स० ४।१८)' इति सः । वुदी ; णिव्वुदी ; संवुदी ; आवुदी । वुत्तं ; वुत्तन्तो ; पउत्तो ; णिउत्तो । पउत्ती ; णिउत्ती ; वुत्ती । भाउओ । मादू ; माउओ ; माउआ । मुणालं । पुहई । बुन्दावणं । जामाउओ ॥ क्वचिदपवादविषयेऽप्युत्सर्गोऽभिनिविशत इति मअङ्को ; मअङ्गो ; पाअअं इत्यादि । अनयोर्गणयोराकृतिगणत्वात् मिणालं ; बिन्दावणं ; पाइअं ; मुअङ्को ; मुइन्दो ; इत्यादि लक्ष्यानुसारात् ॥

३६. अयुक्तस्य रिरिष्यते ॥

वर्णान्तरेणायुक्तस्य ऋतो रिरिष्यते । ऋत इत्यनुवर्तते । रिणं । रिद्धी । युक्तस्य कअं ; हअं ; वसहो ॥

३७. क्वचिदुयक्तस्यापि

वर्णान्तरेण युक्तस्य ऋतस्तेन वर्णेन सह रिः स्यात् । सरी । सरिसो । एरिसो । क्वचिदिति प्रयोगानुसारार्थम् ॥

३८. वृक्षे वेन रुर्वा

वृक्षे वेन सह ऋतो रुर्वा स्यात् । रुक्खो । वच्छो ॥



३९. ऌतस्तु लिः ।

केवलस्य ऌतो लिः स्यात् । तुशब्दस्यावधारणार्थत्वान्नित्यम् । लिआरो ॥

४०. इलिः कॢप्ते

कॢप्ते ऌत इलिः स्यात् । किलित्तं ॥ कॢप्तसारूप्यात् कॢप्तावपि ; किलित्ती ॥

४१. वेदनादेवरकेसर एत इत् ॥

एषु एत इत्स्यात् । मण्डूकप्लुतिन्यायाद्वानुवृत्तिः । विअणा । दिअरो । किसरो । पक्षे वेअणा ; देअरो ; केसरो ॥

४२. एदैतः

ऐतः स्थाने एत्स्यात् । सेण्णं । सेलो । भट्टिकाव्ये—'ऐरावणमदपरिमलगन्धवहाबद्धदन्तिकुलसंरम्भम् (भ० १३।३३)' इत्यपभ्रंशभाषाया एव समावेशो न प्राकृतस्य । प्राकृते सर्वथाप्यैकारासम्भवात् ॥

४३. दैत्यादेरइर्भवेत्

ऐत इत्येव । एतोऽपवादः ।

दैत्यवैदेहवैदेशवैशम्पायनकैतवम् ।
स्वैरवैशाखचैत्यादिरेष दैत्यादिको गणः ॥

दइच्चो । वइएहो । वइएसो । वइसम्पाअणो। कइअवं । सइरं । वइसाहो । चइत्तं ; व्यत्ययादित्वान्न चत्वम् । आदिशब्दात्—'वेलाचन्दणदुमो मइन्देण धुओ (से० ४।७) इति सेतुः ॥

४४. वा तु दैवादेः ।

तु पादपूरणे । दैवादेरैतः स्थाने अइः स्यद्वा ।

दैवं भैरवकैरवचैत्राः कैलासवैरजैत्राद्याः ॥

देव्वं ; दइव्वं । सेवादित्वाद्द्वित्वम् ॥ भइरवो । कइरवं । चइत्तो । कइलासो । वइरं । जइत्तो । पक्षे भेरवो ; केरवं ; इत्यादि ॥

४५. इत्सैन्धवादिषु स्यात्

सैन्धवादिषु ऐत इत्स्यात् ।

सैन्धवभैक्षाजीविकनैयोगिकपैण्डपातिकाः प्रोक्ताः ॥

सिन्धवं । भिक्खाजीविओ । णिओइओ । पिण्डवाइओ ॥

४६. ईर्द्धैर्यस्य

ऐत ईत्स्यात् । धीरम् ॥

४७. प्रकोष्ठ ओतोद्वा ॥

कस्य च वः स्यात्

प्रकोष्ठे ओतः स्थानेऽद्वा स्यात् ; तत्संनियोगात्कस्य च वः स्यात् । पवट्ठो । पओट्ठो ॥

४८. औदोत्

औदोत्स्यात् । सोक्खं । पोढा । महिसी ॥

४९. अउ पौरादेषु

पौरादेषु औदउ स्यात् ।

पौरः कौरवपौरुषपौत्रौचित्यानि कौशलं क्षौरम् ॥

पउरो । कउरवो । पउरिसं । पउत्तो । अउचित्तं । कउसलं । खउरं ; खउरिअं ॥

५०. मौनमौल्योर्वा ।

अनयोरौदउ वा स्यात् । मउणं । मोणं ।—'मोणं हासो तहा तहा अ उ-णिद्दं' इति शृङ्गारोत्कर्षे ॥ मउली । मोली ।—'चाउहाणकुलमोलिमालि-आ (क० १।११)' इति राजशेखरः ॥

५१. आच्च स्याद्गौरवे

औत आत्स्यात् । चकाराद्गोच्च अउ च स्यात् । गारवं । गोरवं । गउरवं ॥

५२. उत्सौन्दर्यादेषु नित्यं स्यात् ॥

सौन्दर्यादिषु औत उत्स्यान्नित्यम् ।

सौन्दर्यं शौण्डिकः शौण्डो दौवारिकोपविष्टके ।

कौक्षेयपौषपौलोमीमौञ्जिदौःसाधिकादयः ॥

सुन्देरं । सुण्डिओ । सुण्डो । दुआरिओ । उअविट्ठअं । कुक्खेओ । पुसो । पुलोमी । मुञ्जाअणो ; मुञ्जी । दूसाहिओ ॥

इति श्रीमार्कण्डेयकवीन्द्रकृतौ प्राकृतसर्वस्वे भाषाविवेचने
महाराष्ट्रयामज्विधिः प्रथमः पादः ॥ १ ॥



१. अयुजोऽनादौ

अयुगयुक्तः । अधिकारोऽयम् । अयुज इत्यापादसमाप्तेः । अनादाविति—'आद्यस्य यो जः स्यात् (प्रा० स० २।३०)' इति यावदधिकृतं वेदितव्यम् ॥

२. प्रायः कगचजतदपबयवां लोपः ।

एषां दशानामयुक्तानामनादौ स्थितानां प्रायो लोपः स्यात् ॥ पाके पाओ ॥ मृगे मओ ॥ शच्यां सई । सचिवे सइवो ॥ गजे गओ ॥ सुते सुओ ॥ मदे मओ ॥ कपौ कई ॥ प्रवृत्ते पउत्तो ॥ पीयूषे पीऊसं ॥ देवे देओ ॥ प्रायोग्रहणात्—उरअडं, णहअरो, इत्यादौ नित्यम्; सुकई, चूचुअं, अंसुजलं, भवणं इत्यादावप्रवृत्तिः, देवरो देअरो, चावो चाओ, सुगमो सुअमो, इत्यादौ विकल्पः; दोहाइज्ज[इ] इत्यादावादेरपि लोपः; लक्ष्यानुसाराद्बोद्धव्यः ॥ अयुक्त इति किम् । मक्कडो । मोग्गरो । तप्तम् तत्तो । तिव्वो । अनादाविति किम् । कई । गाओ । चलो । जलम् ।—'अनादावदितौ वर्णौ पठितव्यौ यकारवत्' इति पाठशिक्षा ।

प्रायोग्रहणतश्चात्र कैश्चित्प्राकृतकोविदैः ।

यत्र नश्यति सौभाग्यं तत्र लोपो न मन्यते ॥

सवहो । पआदो ॥

३. यमुनायां मः

यमुनायां मस्य लोपः स्यात् । जउणा ॥

४. मदकलमरकतयोः कस्य गो भवति ॥

मअगलो । मरगअं ॥

५. भमौ शीकरचन्द्रिकयोः

अनयोः कस्य क्रमेण भमौ स्याताम् । सीभरो । चन्दिमा ॥

६. हो निकषस्फटिकचिकुरेषु ।

एषु कस्य हः स्यात् । णिहसो । फलिहो । चिहुरो ॥

७. **ऋत्वादेस्तो दः स्यात्**

ऋतुरजततातसंयतकिरातसंहृतिसुसंगतक्रतवः ।
संप्रति सांप्रतमुपसर्गात्परतः कृतिवृती वृतश्चापि ।
प्रभृतिर्व्रतमित्याद्या ऋत्वाद्याकृतिगणे ज्ञेयाः ॥

उदू । रअदं । तादो । संजदो । चिलादो । संहिदी । सुसंगदम् । कदू । संपदि । संपदम् । उपसर्गात्परतः कृतीवृती यथा—आइदी, विकिदी, पकिदी, उवकिदी, अवकिदी, आवुदी, परिवुदी, णिवुदी, संवुदी, विवुदी । आवुदो, परिवुदो, संवुदो, पवुदो, विवुदो । पहुदी । वदम् ॥

८. **क्वचिन्न वा**

तो दः क्वचिन्न वा स्यात् ॥ सुरदं । सुरअं ॥ हदो । हओ ॥ आअदो । आअओ ॥ इत्यादि ॥

९. **वसतिभरते हः ॥**

अनयोस्तो हः स्यात् । वसही । भरहो ॥

१०. **डः प्रत्यादौ**

प्रत्यादौ तो डः स्यात् ।

प्रति वेतसः पताका हरीतकी व्याप्ृतं मृतकम् ।
प्राकृतमिति सप्तैते प्रत्यादिगणः समुद्दिष्टः ॥

पडिमा, पडिआरो, पडिवण्णं, पडिहारी । वेडिसो । पडाआ । हरीडई । वावडं । मडअं । पाउडं ॥

११. **ऐरावतगर्भितयोर्णता**

अनयोस्तकारस्य णता णत्वं स्यात् । एरावणो । गब्भिणं ॥

१२. **प्रदीप्यादेः ।**

**दो लः स्यात्**

प्रदीपिर्धातुः । पलिप्पइ, पलित्तो, पलीवो । कदम्बे कलम्बो । दोहदे दोहलं ॥

१३. **संख्यागद्गदयो रः**



संख्याशब्दस्य गद्गदशब्दस्य च दो रः स्यात् ॥ एआरह । वारह । तेरह । पण्णरह । अट्ठारह ॥ गग्गरं भणइ ॥ आदौ तु दह । युक्तस्य तु चउद्दह ॥

१४. **पस्य वः**

स्यात् । पलवो । सवहो ॥

१५. **म आपीडे ॥**

आपीडे पस्य मः स्यात् । आमेलो ॥

१६. **अनीयङादेर्यो ज्जो वा**

अनीयङादेर्यस्य द्वित्वापन्नो जो वा स्यात् । द्वित्वापन्ननिर्देशादत्र पादे शेषादेशयोर्द्वित्वं नास्तीति भावः ॥ वअणिज्जं । वअणीअं ॥ रमणिज्जं । रमणीअं ॥ उत्तरिज्जं । उत्तरीअं ॥ दुइज्जं । दुइअं ॥ तइज्जं । तइअं ॥

१७. **कबन्धे बः पमौ क्रमात् ।**

कबन्धे बस्य पमौ क्रमाद्वा स्याताम् ॥ कपंधो । कमंधो ॥ क्रमादित्येकदा द्वयं स्यादिति शङ्कानिरासार्थम् ॥

१८. **टस्य डः**

स्यात् । पअडं ॥

१९. **शकटादौ ढः**

शकटसटाकैटभेषु टस्य ढः स्यात् । सअढं । सढा । केढवो ॥

२०. **स्फटिके लः**

टस्य लः स्यात् । फलिहो ॥

२१. **अथ ठस्य ढः ॥**

स्यात् । सढो । पढइ ॥

२२. **अङ्कोठे ल्लः**

अङ्कोठे ठस्य ल्लः स्यात् । अङ्कोल्लो । अङ्कोलशब्दे सत्यपि सूत्रमिदम् अङ्कोढो मा भूदित्येतदर्थम् ॥

२३. **डस्य लः स्यात्**

णिअलो । तलाओ ॥

२४. **शिफादौ फस्य भो भवेत् ।**

सिभा। सेभो । शेफालिकायां सेभालिआ, शफर्यां सभरी इत्याद्यपि कश्चित् ॥

२५. **हः खघथधभां च स्यात्**

एषां पञ्चानां चकारात्फस्य च हः स्यात् ॥ मुहं ॥ मेहो ॥ पहो । रहो ॥ बहिरो ॥ गहिरं ॥ कफे कहो । सहलं ॥ * न बिन्दोरिति वक्तव्यम् ॥ संखो । संघो । मंथनं । संधं । संभवो । संफुलं ॥

२६. **ककुदे दस्य**

हः स्यात् । कउहं वसहस्स ॥

२७. **औषधादौ ढः ॥**

औषधादौ यथालाभमेषां ढः स्यात् । ओसढं । प्रथमे पढुमं । शिथिले सिढिलं । निषधे निसढो ॥

२८. **वः कैटभे**

कैटभे भो वः स्यात् । केढवो ॥

२९. **हरिद्रादौ रो ल**

हरिद्रादौ रस्य लः स्यात् ।

मुखराङ्गारयुधिष्ठिरसुकुमाराश्चरणपरिघकरुणाश्च ।
परिखा किरात इत्यादयो हरिद्रादयः प्रोक्ताः ॥

हलद्दा । मुहलो । इंगालो । जहिट्ठिलो । सुउमालं । चलणो । फलिहो । कलुणा । फलिहा । चिलादो ॥

३०. **आद्यस्य यो जः स्यात् ।**

अनादाविति निवृत्तम् । अयुक्तस्येत्यनुवर्तत एव । पदाद्यस्य यस्य जः स्यात् । जोव्वणं । जुत्तं । वारजोव्वणीत्यादौ प्राकृतपदयोः समासः । अनाद्यस्य तु पओहरो । विरसं विरहायासं (मा०मा०६अं) ॥

३१. **यष्ट्यां लः**

यष्ट्यां यस्य लः स्यात् । लट्ठी । तणुलट्ठी ॥

३२. **चो म्लेच्छार्थकिराते**

म्लेच्छार्थकिरातशब्दे आद्यस्य चः स्यात् । चिलादो । अन्यत्र—हरकिराओ अज्जुणेण समं जुज्झइ । अत्र लत्वं च स्यात् । न । प्रायोऽनुवृत्तेः ॥



३३. **खस्तु कुब्जकन्धरयोः ॥**

अनयोराद्यस्य खः स्यात् । खुज्जो । खन्धरा । अनभिधानात् पुष्पार्थस्य न स्यात् । कुज्जअकुसुमम् ॥

३४. **दशतिदहत्योर्डः स्यात्**

अनयोर्धात्वोराद्यस्य डः स्यात् । डंसइ, डंसणो, डंसो । डहइ, डहणो, डाहो ॥

३५. **वा दोहददण्डदोलासु ।**

एष्वादेर्डो वा स्यात् । डोहलं । डण्डो । डोला । पक्षे दोहलमित्यादि । नामणिङि डोहलेइ । डोलेइ ॥

३६. **परुषादीनां फः स्यात्**

आद्यस्येत्येव ।

परुषं परिघः परिखा परिधिः पनसश्च परुषादिः ॥

फरुसं । फलिहो । फलिहा । फलिही । फणसो ॥

३७. **बिसस्य भः**

आद्यस्य भः स्यात् । भिसं ।—'सिसिरेण कअं भिसिणिसंडं (गा० स० १।८)' ॥

३८. **मन्मथे वः स्यात् ॥**

आद्यस्येत्येव । वम्महो ॥

३९. **लाङ्गूलादेर्णो वा**

आद्यस्य णो वा स्यात् ॥ लंगूलं । णंगूलं ॥ लंगलं । णंगलं ॥ लोहलं । णोहलं ॥

४०. **षट्शावकसप्तपर्णे छः ।**

एष्वाद्यस्यच्छः स्यात् । छप्पओ, छम्मुहो । छाबओ ; स्वार्थिकस्य कस्याप्राधान्यात् छाओ । छत्तिवण्णो ॥

४१. **नो णः**

आद्यस्येति निवृत्तम् ।—'आदेर्वा (प्रा० स० २।४३)' इति वक्ष्यमाणत्वात् । सर्वत्र नस्य णः स्यात् । नयनं णअणं । वणं । वाणरो ॥ अयुक्त

स्येत्येव । मन्थो । मन्थणं । चन्दणं । चण्डणं चण्डणो दाढादित्वात् ॥

४२. **द्वित्वेऽपि**

नकारस्य द्वित्वे सत्यपि णः स्यात् । युक्तत्वादप्राप्तौ वचनमिदम् । उण्णओ । सण्णओ । उण्णमइ । उण्णेइ । प्रतिपन्नम् पडिवण्णं । अत्र द्वौ नकारौ णत्वं प्राप्तौ ॥ केचिदेतादृशेषु विकल्पमिच्छन्ति — आसन्नं, आसण्णं; सण्णद्धं, सन्नद्धम्;—'सन्नद्धं परबलं रणायाससहम् (भ० १३।४५)' इति भट्टिः ॥

४३. **आदेर्वा**

आदेर्नकारस्य णो वा स्यात् ॥ नाराअणो । णाराअणो ॥ नअरं । णअरं ॥

४४. **शषयोः सः**

सर्वत्र शषयोः सः स्यात् । सेसो । विसमसरो ॥

४५. **दशनि हः स्यात् ॥**

दशन्शब्दे शस्य हः स्यात् । दह । एआरह । वारह । तेरह । चउद्दह । पण्णरह । सत्तरह । अट्ठारह । कथम्—'दससु णहदप्पणेसुं (    )' । प्रायोऽनुवृत्तेः समाधेयम् ॥

४६. **वा नाम्नि**

नाम्नि विषये दशन्शब्दे शस्य हो वा स्यात् । दहरहो । दसरहो ॥ दहबलो जिनभेदः । दसबलो ॥ दहमुहो । दसमुहो ॥

४७. **दिवसपाषाणयोः सषोश्चैवमेव स्यात् ।**

एवमेव हो वा स्यादित्यर्थः ॥ दिअहो । दिअसो ॥ पाहाणो । पासाणो ॥

४८. **छायायां यस्य तथा वाच्यश्चेदातपाभावः ॥**

यस्य यकारस्य तथा हो वा स्यात् । स्पष्टमन्यत् । छाही,—'आदीतौ बहुलम् (प्रा० स० ५।३१)' इतीत् । पक्षे छाआ ॥

इति श्रीमार्कण्डेयकवीन्द्रकृतौ प्राकृतसर्वस्वे भाषाविवेचने
महाराष्ट्र्यामयुक्तवर्णविधिर्द्वितीयः पादः ॥ २ ॥

१. **उपरिस्थाः कगडतदपबषसो लोप्याः**

उपरि स्थिता एते नव वर्णा लोप्याः स्युः ॥ सोभाजुत्तं ॥ मुद्धं ॥ खग्गो ॥ उक्कंठा । उत्तमे तलोपे पुनर्द्वित्वम् उत्तमं । उप्पलं ॥ मुग्गो ॥ सुत्तो ॥ सद्दो । खुज्जो ॥ छट्ठो ॥ खलिअं ॥ षट्पदे छप्पओ, षण्मुखे छम्मुहो, स्थानिवद्भावाट्टलोपः ॥ उपरिस्था इति किम् । अक्को । मुक्खो ॥

२. **अधो मनयः ।**

अधः स्थिता मनयो लोप्याः स्युः । युग्मे जुग्गं । भग्ने भग्गं । सौख्ये सोक्खं ॥

३. **लवरः सर्वत्र**

सर्वत्र उपर्यधो वा लोप्याः स्युः ॥ वक्कलं । शुक्ले सुक्को ॥ शब्दे सद्दो । बिल्वे बेलं ॥ शक्रे सक्को । अक्को ॥

इह सूत्रत्रये लक्ष्यानुरोधेन लोपः क्वचिदुपर्येव, क्वचिदध एव वानुसन्धेयः । तथाहि; जुग्गं लग्गमित्यादौ न गलोपः, बेल्लं बिल्लं पल्ललं इत्यादौ न ललोपः; भव्वं उव्विण्णं इत्यादौ न वलोपः; धम्मो घम्मो इत्यादौ न मलोपः ॥

४. **द्रे रो वा**

लोप्य एव ॥ चंद्रो । चंदो ॥ इंद्रो । इंदो ॥ भद्रं । भद्दं ॥ बिंद्रावणमित्यत्र द्र आदेशसामर्थ्यान्न लोपप्रसङ्गः ॥

५. **सर्वेङ्गिते ज्ञो ञः ॥**

अनयोरुपपदयोर्ज्ञकारे ञो लोपः । सव्वज्जो । इङ्गिअज्जो ॥

६. **ण्णुअ जाणुअ इत्येतावप्यकृतज्ञादिषु स्याताम् ।**

अकृतज्ञादिषु ज्ञो ण्णुअ जाणुअ इत्येतौ वादेशौ स्याताम् । ण्णुअ इति द्वित्वापन्ननिर्देशोऽयम् ।

अकृतज्ञविज्ञदैवज्ञमनोज्ञाल्पज्ञसुकृतज्ञाः ।
अज्ञात्मज्ञपरज्ञाश्रितज्ञश्चैवमाद्याः स्युः ॥

अकअण्णुओ । अकअजाणुओ ॥ विण्णुओ । विजाणुओ ॥ देव्वण्णुओ । देव्वजाणुओ ॥ मणण्णुओ । मणजाणुओ ॥ अप्पण्णुओ । अप्पजाणुओ ॥ सुकअण्णुओ । सुकअजाणुओ ॥ अण्णुओ । अजाणुओ ॥ अप्पण्णुओ । अप्पजाणुओ ॥ परण्णुओ । परजाणुओ ॥ चित्तण्णुओ । चित्तजाणुओ ॥ कश्चिदिङ्गितज्ञमप्यत्रेच्छति । तन्मते इंगिअण्णुओ इंगिअजाणुओ इंगिअज्जो इति त्रयम् । अपिशब्दात् ञलोपोऽपि लक्ष्यानुरोधात् । अकअज्जो विज्जो मणज्जो इत्यादि ॥

७. **श्मश्रुश्मशानयोरादिः**

लोप्य इत्येव । मंसू । मसाणं ॥

८. **मध्याह्ने हकारश्च ॥**

चकारः पूरणः । हकारो लोप्यः । मज्झण्णो । ण्हत्वापवादोऽयम् ॥

९. **श्लक्ष्णस्य शलौ क्रमतः**

लोप्यौ ॥ लण्हं । सण्हं ॥

१०. **शचावुभावपि हरिश्चन्द्रे ।**

उभावपीत्यक्रमार्थम् । हरिअंदो ॥

११. **हस्याधो णलमां स्थितिरूर्ध्वे**

हकारस्याधः स्थितानां णलमामूर्ध्वे स्थितिः स्यात् । पुव्वण्हो । कल्हारम् । आह्लादे अल्हादो । बम्हणो । जिम्हो ॥

१२. **युक्तस्य**

अधिकारोऽयमापादसमाप्तेः ॥

१३. **ठः ष्टस्य ॥**

ष्टस्य ठः स्यात् । कट्ठं । दिट्ठी ॥

१४. **उष्ट्रे वा**

ष्टस्य ठो वा स्यात् ॥ उट्ठो । उट्टो ॥

१५. **अस्थ्यादेर्नित्यम्**

युक्तस्य नित्यं ठः स्यात् । अट्ठी । चउट्ठं; चउत्थी । विसंठुलं । ग्रन्थौ गण्ठा इति दाढादित्वात् । उट्ठिअं इत्यादि तिङ्विधौ सिद्धम् ॥



१६. **थः स्तस्यास्तवस्तम्भे ।**

स्तवस्तम्भाभ्यामन्यत्र स्तस्य थः स्यात् । थणो । सुत्थिरो । थुई । स्तवस्तम्भयोस्तु तवो, तंभो ॥

१७. **खः स्थूणार्थे स्तम्भे**

स्थूणार्थे स्तम्भे स्तस्य खः स्यात् । खंभो । अन्यत्र—'ऊरुत्तंभेण रुंभिअं गमणं ( )' ॥

१८. **स्फोटे स्थाणौ च**

अनयोर्युक्तस्य खः स्यात् । खोडो; खोडओ । खण्णू; नीडादित्वाद्द्वित्वम् ॥

१९. **न हरार्थे ॥**

स्थाणावित्येव । हरार्थे स्थाणौ खो न स्यात् । थाणुं पणमह ॥

२०. **र्यय्याभिमन्यौ जः**

र्यय्ययोरभिमन्यौ च युक्तस्य जः स्यात् ॥ कज्जं । सुज्जो ॥ न्याय्ये णज्जं । सान्नाय्ये सण्णज्जं । शय्यायां सेज्जा ॥ अहिमज्जू ॥

२१. **तूर्यादौ रः**

र्यस्येत्येव । तूर्यादौ र्यस्य रः स्यात् ।

तूर्यपर्यन्तसौन्दर्यशौटीर्याश्चर्यधैर्यकम् ॥

तूरम् । पेरन्तो । सुंदेरं । सोडीरं । अच्छेरं । धीरम् । सूरशब्दात् सूरो ॥

२२. **चौर्यसमे रिअः ।**

चौर्यसमे र्यस्य रिअः स्यात् ।

माधुर्यधुर्यगाम्भीर्याचार्यस्थैर्यमव्ययं तिर्यक् ॥

चोरिअं । माहुरिअं । धोरिअं; तुण्डादित्वादोत्वम् । गंभीरिअं । आआरिओ । तिरिअं । थेरिअं ॥ अनव्ययं तिर्यकतः तेरच्छं तिरच्छं इति दाढादित्वात् (?) ॥ * निरो माल्ये लिअ इति वक्तव्यम् ॥ णिम्मालिअं ॥

२३. **शौर्यार्यभार्याश्चर्ये वा**

एषु र्यस्य रिअः स्याद्वा ॥ सोरिअं । सोज्जं ॥ आरिओ । अज्जो ॥ भारिआ । भज्जा ॥ अच्छरिअं । अच्छेरं ॥

२४. **पर्यस्तादिषु लो भवेत् ॥**

र्यस्येत्येव ।

पर्यस्तः पर्याणं पर्यङ्कः सौकुमार्यं च ॥

पल्लत्थो । पल्लाणं । पल्लंको । सोअमल्लं; सोमल्लं सन्धावल्लोपात्; सोमालम् दढादित्वात् ॥

२५. **आर्द्रे द्रस्य न वा स्यादादेरोच्च**

युक्ताधिकारेऽपि द्रस्येति कृतम् अर्पिते निवृत्त्यर्थम् । आर्द्रे द्रस्य लो न वा स्यात् । आदेरोच्च न वा स्यात् । ओल्लं । अल्लं । ओद्दं । अद्दं ॥

२६. **अर्पितेऽप्येवम् ।**

एवमिति आदेरोद्वा स्यात् । ओप्पिअं । अप्पिअं ॥

२७. **आधूर्तादौ र्तस्य टः स्यात्**

केवट्टो । णट्टओ । वट्टिआ । णच्चिरी, णच्चणम् इति 'चो व्रजिनृत्योः (प्रा० स० १।११)' इति चत्वविधानात् । वर्त्मनि नलोपः; वट्टं । धूर्तादौ तु धुत्तो ।

धूर्तार्तकीर्तिसंवर्तिवार्ताकार्तिकमूर्तयः ।
कर्तरीकीर्तनावर्तिवर्तमानमुहूर्तकाः ।
निर्वर्त्योद्वर्त्यमूर्ताश्च कर्तृभर्तृमुखास्तथा ॥

अत्तो । कित्ती । निर्वर्त्ये यलोपे णिव्वत्तं । कत्ता; कत्तारो । भत्ता; भत्तारो । हत्ता; हत्तारो ॥

२८. **मृत्तिकायां च पत्तने ॥**

अनयोर्युक्तस्य टः स्यात् । मट्टिआ । पट्टणम् ॥

२९. **गर्ते डः**

र्तस्य डः स्यात् । गड्डो ॥

३०. **गर्दभादौ र्दः**

गर्दभादौ र्दस्य डः स्यात् ।

गर्दभसंमर्दौ विच्छर्दिवितर्दी कपर्दविच्छर्दौ ॥

गड्डहो । संमड्डो । विच्छड्डी । कवड्डो । विच्छड्डो ॥ तर्दुरिति केचित् । तड्डू ॥

३१. **त्यथ्यद्यां चछजाः स्मृताः ।**

यथासंख्यमेव । सच्चं । पच्छं । विज्जा ॥



३२. **न व्यत्ययादौ**

व्यत्ययादौ नैते स्युः ।

व्यत्ययचैत्यात्ययसामर्थ्यातिथ्यानवद्यपद्ये च ।
उद्यतमित्यत्र गणे केचिद्गद्योद्यमौ न वेच्छन्ति ॥

वत्तओ ॥ चइत्तं ॥ अत्तओ ॥ सामत्थं ॥ आइत्थं ॥ अणवद्दं ॥ पद्दं ॥ उद्दअं ।—

'गाढालिंगणरहसुद्दअम्मि दइए लहु समोसरइ ।
माणंसिणीण माणो पीडणभीओ व्व हिअआदो ॥ (का० प्रदी० ११४ पृ०)' इति सप्तशती (?) ॥ गद्ये गद्दं गज्जं ॥ उद्यमे उद्दमं उज्जमं ॥

३३. **ध्यह्योर्झः**

अनयोर्झः स्यात् ॥ संझा । मज्झं ॥ ग्राह्ये गेज्झं । दाह्ये डज्झं ॥

३४. **साध्वसे ध्वस्य वा भवेत् ॥**

झ इत्येव ॥ सज्झसं । सद्धसं ॥ * युद्धे द्धस्य वेत्येके ॥ जुज्झं । जुद्धं ॥

३५. **अस्निग्धादौ ग्धर्धयोर्ढः**

स्निग्धादेरन्यत्र ग्धर्धयोर्ढः स्यात् ॥ विअड्ढो ॥ वड्ढइ । कुलवड्ढणो ॥ स्निग्धादौ तु—सिणिद्धो, मुद्धो, दुद्धं; णिद्धणो, गोवद्धणो ॥ स्निग्धादिराकृतिगणः ॥

३६. **द्धब्धयोरपि कुत्रचित् ।**

ढ इत्येव ॥ वुड्ढो । परिअड्ढी ॥ थड्ढो । लुब्धे लुड्ढो; लुद्धो इत्येके ॥ कुत्रचिद्ग्रहणात् लोद्धओ; बुद्धी, सुद्धो, सिद्धो, समिद्धी इत्यादयः ॥

३७. **ष्कस्कक्षां खः**

स्यात् ॥ पोक्खरं ॥ अवक्खरो ॥ पक्खो ॥

३८. **क्वचिन्न स्यात्**

धाणुक्को । निष्क्रान्तौ णिक्कंती । णिक्कंपो ॥ सक्कारो । सक्कअं ॥

३९. **क्वचिद्वा**

णिक्को णिक्खो; कंधो खंधो; णिक्कमइ णिक्खमइ; इत्यादि ॥

४०. **छः क्षुरादिषु ॥**

क्षुरादिषु क्षस्य छः स्यात् ।

क्षुराक्षिमक्षिकाक्षीरसदृक्षक्षेत्रकुक्षयः ।
इक्षुक्षुधाक्षुधौ चेति क्षुरादिः कथितो गणः ॥

छुरं । अच्छी । मच्छिआ । छीरं । सरिच्छो । छेत्तं । कुच्छी । उच्छू । छुहा । छुधं क्षुधम् (?)। छुहा ॥ कश्चित् द्वित्वापन्नं छमिच्छति । तदयुक्तम्—'धवलाअन्तेसु सालिछेत्तेसु (गा० स० १।९)' इत्यादिलक्ष्यविरोधात् ॥

४१. **क्ष्मस्य च स्यात्**

छ इत्येव । लच्छी । यक्ष्माणि जच्छो ॥

४२. **क्षमादेर्वा**

छ इत्येव ।

क्षमावृक्षक्षणोत्क्षिप्ता लक्षणो दक्षवक्षसी ।
क्षारः क्षुण्णं तथोक्षा चेत्यादयः स्युः क्षमादयः ॥

खमा । छमा । आप्रत्ययान्तनिर्देशात् कम्मक्खमो । क्ष्माशब्दस्य विकर्षे क्षमा इत्यस्यापि खमा छमा ॥ वृक्षे व्यवस्थितविभाषया अत्वपक्ष एव छः । वच्छो । रुक्खो ॥ एवमुत्सवार्थ एव क्षणे । छणो । कालविशेषार्थे तु—'वीसमामि खणं (का० प्रदी० ५८ पृ०)' ॥ उक्खित्तो । उच्छित्तो ॥ लच्छणो । लक्खणो ॥ दच्छो । दक्खो ॥ वच्छो । वक्खो ॥ छारो । खारो ॥ छुण्णं । खुण्णं ॥ उच्छा । उक्खा ॥

४३. **म्हः ष्मविस्मयपक्ष्मणाम् ।**

ष्मस्य विस्मयपक्ष्मणोश्च युक्तस्य म्हः स्यात् ॥ उम्हा ॥ विम्हओ ॥ पम्हलं ॥

४४. **फो वा श्लेष्मणि**

ष्मस्य फो वा स्यात् ॥ सेप्फो । 'सेम्हा गरुई ( )' । स्त्रीत्वं लोकतः ॥

४५. **कूष्माण्डे हः स्यादोत्वमुतस्तथा ॥**

वेत्येव । तथेति हत्वे सति उत ओत्वं स्यात् ॥ कोहंडो । कुम्हंडो ॥ कोहंडी कुम्हंडी इति च लतायाम् । फले कोहंडं कुम्हंडं ॥ * सत्त्वान्तरे नित्यमित्ये-



के ॥ कोहंडो भासेइ ॥

४६. **कार्षापणे हः**

ह इत्यनुवृत्तावपि पुनः करणं वानुवृत्तिनिरासार्थम् । युक्तस्य हः स्यात् । काहावणो ॥

४७. **चिन्हे न्धः**

युक्तस्य न्धः स्यात् ।—'अनुराअपढुमइंधं ( )' ॥

४८. **ष्पस्पयोः फत्वमिष्यते ।**

पुप्फं ॥ फड्ढी ॥

४९. **स्पस्य लोपः कचित्**

स्पस्येत्येव । णिप्पंदो । परोप्परं ॥

५०. **पस्य कचित्**

लोपः स्यात् । वणस्सई । सिहइ स्पृहयति ॥

५१. **छत्वं भवेत्कचित् ॥**

स्पस्येत्येव । छिहा स्पृहा ॥

५२. **बाष्पेऽश्रुणि हः**

अश्रुणि वाच्ये बाष्पे युक्तस्य हः स्यात् । बाहो । अन्यत्र—'बप्फं हेमन्तसरआसुं ( )' ॥

५३. **श्चत्सप्सां छः स्यात्**

पच्छिमं । अच्छेरं ॥ मच्छरो । वच्छदरी ॥ लिच्छा । अच्छरा ॥ णिच्चलमित्यादि सन्धौ विसर्गलोपात् ॥

५४. **नोत्सुकोत्सवयोः ।**

त्सस्य च्छो न स्यादनयोः । ऊसुओ । ऊसवो ॥

५५. **वृश्चिके ञ्छः**

श्चस्य ञ्छः स्यात् । विञ्छुओ ॥

५६. **न्मस्य मः**

स्यात् । वम्महो । सम्मग्गो ॥

५७. **णो ज्ञपञ्चदशादिषु ॥**

ञ्ञे ञ्ज्ञे पञ्चदशादिषु युक्तस्य च णः स्यात् ॥ पज्जुण्णो । णिण्णं ॥ विण्णाणं ॥ पण्णरह । पञ्चाशत् पण्णासा । पञ्चशती पण्णसई । पञ्चविंशतिः पण्णवीसा ॥

५८. **चत्वरे चः**

युक्तस्य चः स्यात् । चच्चरं ॥

५९. **मृदुत्वे कः**

युक्तस्य कः स्यात् । मउक्कं ॥

६०. **पः क्मकुट्मलयोर्भवेत् ।**

क्मस्य कुट्मले युक्तस्य च पो भवेत् । रुप्पिणी । कुप्पलं ॥

६१. **वात्मनि**

आत्मनि युक्तस्य पो वा स्यात् ॥ अप्पा । अत्ता ॥ अप्पाणो । अत्ताणो ॥ तादात्म्यमाहात्म्ययोः प एव मित्य (? नित्यम) भिधानात् । ताअप्पं । माहप्पं ॥

६२. **भो ह्वः**

ह्वो भः स्याद्वा ॥ गब्भरो । गहरो ॥ जिब्भा । जीहा ॥ पब्भो । पहो ॥

६३. **वस्यापि विह्वले**

विह्वले ह्वो भः स्यात् । वस्यापि भः स्तात् । भिब्भलो । वानुवृत्तेः विहलो ॥

६४. **भिन्दिपाले ण्डः ॥**

युक्तस्य ण्डः स्यात् । भिण्डिवालो ॥

६५. **वृन्ते ण्टः**

युक्तस्य ण्टः स्यात् । वेण्टं ॥

६६. **शादिशिरःस्थयोर्नणोर्ण्हः**

शादयः शषसहाः । तच्छिरःस्थयोर्नणोर्ण्हः स्यात् ॥ पण्हो ॥ उण्हं ॥ ण्हाणं ॥ श्लक्ष्णे सण्हं ; उपरिस्थाः (प्रा० स० ३।१) इति कलोपे ण्हत्वं ॥

६७. **स्निहेर्न स्यात् ।**

ण्ह इत्येव । सिणिज्झइ ॥ सिणिद्धो । णिद्धो ॥ सिणेहो । णेहो ॥

६८. **तीक्ष्णे निशितार्थे खः**



निशितार्थे तीक्ष्णे युक्तस्य खः स्यात् । तिक्खो सरो । अन्यत्र तिण्हो रइ-किरणो ॥

६९. **शेषादेशावनादौ द्विः ॥**

अनादौ वर्तमानौ शेषादेशौ द्विः स्याताम् । लुप्तावशिष्टः शेषः । मुग्गरो ॥ रच्छा । विण्णाणं ॥ आदौ तु गामो ; खंभो ॥

७०. **वर्गेऽत्र युजः पूर्वः**

युगिति समानां द्वितीयचतुर्थानां संज्ञा । अत्र द्विर्भावे वर्गे वर्गमध्ये युजो द्वितीयचतुर्थयोः स्थाने पूर्वः । कोऽर्थः । द्वितीयस्य प्रथमश्चतुर्थस्य तृतीयः स्यात् । रुक्खो । अग्घो । रच्छा । उअज्झाओ । सेट्ठो । वुड्ढो । पत्थिदो । मुद्धो । पुप्फं । गब्भं ॥ युज इति किम् । कक्कसो । रज्जू । गड्डहो । मग्गो ॥

७१. **नीडादौ**

अनादौ द्विरिति द्वयमेवानुवर्तते । न शेषादेशयोरिति । नीडादावनादौ द्विः स्यात् ।

नीडव्याहृतमण्डूकस्रोतांसि प्रेमयौवने ।
त्रैलोक्यस्थूलतैलर्जुस्थूणार्थस्थाणुमुख्यकाः ॥

णेड्डं । वाहित्तं ; ऋष्यादित्वादित्त्वम् । मंडुक्को । सोत्तो । पेम्मं । जोव्वणं । तेल्लोक्कं । यौवनत्रैलोक्ययोर्मध्य एव द्वित्वं लक्ष्यानुसारात् । थुल्लं । तेल्लं । उज्जू ; ऋत्वादित्वादृत उत्वम् । खण्णू ; अन्यत्र थाणू ॥

७२. **आम्रकम्रताम्रे बः ।**

एषु रेफलोपे सति बकारागमः स्यात् । व्याख्यानतो विशेषलाभः इति न्यायात् मकारस्याध एव । अंबो । कंबो । तंबो ॥

७३. **न रहौ**

रहौ द्विर्न स्याताम् ॥ धरिम् ॥ जीहा । बाहो ॥

७४. **आङो ज्ञो णः**

आङ उत्तरस्य ज्ञ आदेशो णो द्विर्न स्यात् ॥ आणा । आणत्ती । आणवेइ ॥ आङ इति किम् । विण्णाणं । अहिण्णाणं ॥

७५. **सेवादौ वा**

सेवादावनादौ द्विर्वा स्यात् । कचिदप्राप्ते कचित्प्राप्ते च विकल्पः ।

सेवा कौतूहलं दैवं निहितं नखजानुनी ।
त्रैलोक्यं कर्णिकारश्च वेश्या भूर्जं च दुःखितम् ॥
उत्सवोत्सुकदीर्घैकशिवतूष्णीकरश्मयः ।
दुष्करो निष्कृपो रात्रीश्वरदुर्लभनायकाः ॥
वद्वापिवादयः कर्मकरो मन्ये परस्परम् ।
अश्वाश्रचित्तपुष्याद्याः प्रादीणश्च श्रमिश्वसी ॥

सेवा । सेव्वा ॥ कोउहलं । कोउहल्लं ॥ देवं । देव्वं ॥ णिहिअं । णिहित्तं ॥ णहो । णक्खो ॥ जाणू । जण्णू ॥ तेलोअं । तेल्लोक्कं ॥ कणिआरो । कण्णिआरो ॥ वेसा । वेस्सा ॥ भूजं । भुज्जं ॥ दुहिओ । दुक्खिओ ॥ ऊसवो । उस्सवो ॥ ऊसुओ । उस्सुओ ॥ दीहो । दिग्घो ॥ एओ । एक्को ॥ सिवो । सिव्वो ॥ तुण्हीओ । तुण्हिक्को ॥ रसी । रस्सी ॥ दुअरो । दुक्करो ॥ णिइवो । णिक्किवो ॥ राई । रत्ती ॥ ईसरो । इस्सरो ॥ दुलहो । दुल्लहो ॥ णाअओ । णाअक्को ॥ वत्प्रत्ययोव्ययः । चक्रवद्भ्रमतीत्यत्र—चक्क व्व भमइ । चक्क व भमइ ॥ वाशब्दस्य यथादित्वेन ह्रस्वत्वपक्ष एव द्वित्वम् । चंदो व । चंदो व्व । अन्यत्र चंदो वा ॥ चंदो पिव । चंदो प्पिव ॥ आदिना—मेहो मिव मेहो म्मिव । चंदव्व मेहप्पिव रुक्खव्विव पुत्तम्मिव इत्यादौ द्वित्वे सन्धावोकारलोपो दृश्यते ॥ कम्मअरो । कम्मक्करो ॥ मणे । मण्णे ॥ परोवरं, परोप्परं; सन्धावोत्वम् ॥ आसो । अस्सो ॥ आसं । अस्सं ॥ चिअं । चित्तं । चिणमिति केचित् ॥ पुसो । पुस्सो ॥ प्रादेरिण उत्तरौ श्रमिश्वसी धातू यथा—विस्समइ, वसिमइ; विस्ससइ, वीससइ; वीसामो, विस्सामो; णीसासो, णिस्सासो; ऊसासो, उस्सासो; ऊससइ, उस्ससइ; इत्यादि ॥

७६. **समास उत्तरतः ॥**

समास उत्तरत उत्तरपदे आदेर्द्वित्वं वा स्यात् ॥—'परव्वसो अप्पा (रत्ना० २।१)' । परवसो अप्पा ॥—'बवसाअरइपओसो (से० १।१४)' । रइप्पओसो ॥—'बद्धप्फलम्मि कुसुमे ( )' । बद्धफले ॥



७७. **श्लिष्टम्लिष्टक्रियारत्नशार्ङ्गेषु स्याद्विकर्षणम् ।**
**पूर्वं तत्स्वरवच्च स्यात्**

युक्तस्य विकर्षणं विश्लेष इत्यर्थः । अधिकारोयमा पादसमाप्तेः । एषु विकर्षणं स्यात् । तच्च पूर्वं तत्स्वरवच्च स्यात् । तस्य विकृष्यमाणस्य स्वरोऽस्मिन्निति तत्स्वरवत् । सिलिट्ठं ॥ मिलिट्ठं ॥ किरिआ ।—'झाणेण वेअपढणेण कदुक्किआहिं (कर्पू० १।२४)' इति राजशेखरस्यापपाठ एव । रअणं । सारङ्गपाणी ॥

७८. **कृष्णे वा स्यात्**

विकर्षणं तत्स्वरवच्च पूर्वं वा स्यात् । कण्हो मेहो । कसणो ॥

७९. **न नामनि ॥**

नामनि संज्ञायां कृष्णे विकर्षणं न स्यात् । कण्हो त्ति णंदतणओ ॥

८०. **इः श्रीह्रीक्लान्तम्लानक्लिशिषु**

पूर्वमिति विभक्तिविपरिणामेन सप्तम्यन्तमेवानुवर्तते । एषु विकर्षणं स्यात्, तत्र पूर्वस्मिन् इः स्यात् । सिरी ॥ हिरी ॥ किलंतो ॥ मिलाणो ॥ क्लिशिर्धातुः । किलिस्सइ । किलेसइ ॥

८१. **प्नस्य च स्वप्ने ।**

स्वप्ने प्नस्य विकर्षणं स्यात् । तत्र पूर्वस्मिन्निश्च । सिविणो ॥

८२. **र्शर्षर्हेषु स्यात्**

एषु विकर्षणं स्यात् । पूर्वस्मिन् इश्च । आअरिसो । वरिसणं । गरिहा ॥

८३. **स्पृशिदृश्योर्वा स्यात्**

अनयोर्धात्वोः सम्बन्धिनो र्शस्य विकर्षणं स्यात् । पूर्वं तत्स्वरवच्च । फरिसेइ; फंसेइ । फरिसो; फंसो ॥ दरिसेइ; दंसेइ । दरिसणं; दंसणं ॥

८४. **क्वचिन्न स्यात् ॥**

र्शर्षयोर्विकर्षः क्वचित् न स्यात् ॥ पार्श्वे पासं ॥ वर्षासु वासाओ ।—'वासागमम्मि मग्गो घरहुत्तमणेण पहिएण (गा० स० ७।९४)' ॥

८५. **बर्हार्हेरिच्च**

बर्हेऽर्हधातौ च र्हस्य विकर्षः स्यात् । पूर्वस्मिन्नः स्यात् चकारादिच्च ।

बरहं ; बरिहं । बरही ; बरिही ॥ अरहइ ; अरिहइ । अरहणा ; अरिहणा ॥

८६. दशार्हे ह्लुक्

दशार्हे र्हकारे ह्लुक् स्यात् । दसारो ॥

८७. वज्रस्य वा प्रागित् ।

वज्रस्य युक्तविकर्षो वा स्यात् । तत्र प्रागिच्च स्यात् ॥ वइरं । वज्जं ॥

८८. प्लोषप्लुष्टश्लोकस्नायुषु नित्यं

एषु विकर्षो नित्यं स्यात्प्रागिच्च ॥ पिलोसो ॥ पिलुट्ठो ॥ सिलोओ ॥ सिणाऊ ॥

८९. न वा स्नातेः ॥

स्नातेर्विकर्षो न वा स्यात्प्रागिच्च । सिणाइ ; ण्हाइ । सिणाणं ; ण्हाणं ॥

९०. एवं स्निहेरपि स्यात्

स्निहेर्धातोरपि विकर्षो वा प्रागिच्च । णिज्झइ ; सिणिज्झइ । णिद्धो ; सिणिद्धो । णेहे ; सिणेहो ॥

९१. पूर्वे वस्यापि मत्वं च ।

पूर्वे विकर्षो वा स्यात् प्रागिच्च । वकारस्यापि मत्वं च स्यात् । पुरिमं । पुव्वं ॥

९२. अः क्ष्माश्लाघ्योः

क्ष्माशब्दस्य श्लाघृधातोश्च विकर्षः स्यात् प्रागकारश्च । नवेति निवृत्तम् । छमा ॥ सलाहइ । सलाहा । सलाहणिज्जो ॥

९३. ज्यायामीत्स्यात्

ज्याशब्दे विकर्षः स्यात् । प्राक् च दीर्घेकारः स्यात् । जीआ ॥

९४. उत्पद्मतन्व्याद्योः ॥

पद्मादौ तन्व्यादौ च विकर्षः स्यात्प्रागुच्च ।

पद्मघस्मरकाश्मीरवेश्मसद्माम्रादयः ॥
तन्वी लघ्वी मृद्वी पट्वी साध्वी च गुर्वी च ।
पूर्वी च बह्वचाशिश्वी पृथ्वी चेत्यादयः प्रोक्ताः ॥

पउमं ; पउमा । पोम्मा , पोम्मराओ , दाढादित्वात् । घसुमरो । कसुमीरा । वेसुमो । सउमो । अउमरो ॥ तणुई । लहुई । मउई । पडुई । साहुई । गरुई । पुरुई । बहुई । असिसुई । पुहुई ; ऋत्वादित्वाद्दत उत् ॥

41

# ॥ श्रीः ॥


१. सिद्धिर्लोकाच्च
२. अनुक्तमन्यशब्दानुशासनवत् ।
३. संज्ञा प्रत्याहारमयी वा
४. सुप्स्वादिरन्त्यहला ॥१॥
५. हो ह्रस्वः
६. दिर्दीर्घः
७. शषसाः शुः
८. सः समासः
९. आदिः खुः ।
१०. गो गणपरः
११. द्वितीयः फुः
१२. संयुक्तं स्तु
१३. तु विकल्पे ॥ २ ॥
१४. प्रायो लिति न विकल्पः
१५. शिति दीर्घः
१६. सानुनासिकोच्चारं ङित् ।
१७. बहुलम्
१८. दिहौ मिथः से
१९. सन्धिस्त्वपदे
२०. न यण्
२१. एङः ॥ ३ ॥
२२. शेषेऽच्यचः
२३. तिङः
२४. लोपः
२५. अन्त्यहलोऽश्रदुदि
२६. निर्दुरि वा ।
२७. अन्तरि च नाचि
२८. शिरलुङ् नपुनरि तुः
२९. अविदुचति स्त्रियामाल्
३०. से रा ॥ ४ ॥
३१. हः क्षुत्ककुभि
३२. धनुषि वा
३३. सशाशिषि
३४. स आयुरप्सरसोः ।
३५. दिक्प्रावृषि
३६. शरदामत्
३७. तु सक्खिणभवन्तजम्मणमहन्ताः ॥ ५ ॥
३८. यत्तत्सम्यग्विष्वक्पृथकोमल्
३९. मोऽचि वा
४०. बिन्दुल् ।
४१. हलि ङञणनाम्
४२. स्वरेभ्यो वक्रादौ
४३. क्त्वासुपोस्तु सुणात् ॥६॥

४४. लुङ् मांसादौ
४५. संस्कृतसंस्कारे
४६. डे तु किंशुके
४७. वर्गेऽन्त्यः ।
४८. विंशतिषु त्या श्लोपल्
४९. स्नमदामशिरोनभो नारि
५०. शरत्प्रावृट् ॥ ७ ॥
५१. अक्ष्यर्थकुलाद्या वा
५२. क्लीबे गुणगाः
५३. स्त्रियामिमाञ्जलिगाः ।

इति प्रथमाध्यायस्य प्रथमः पादः ॥

---

१. निष्प्रती ओत्परी माल्य-
स्थोर्वा॰।॰
२. आदेः
३. लुगव्यय ॥ ८ ॥ त्य-
दाद्यात्तदचः
४. वालाब्वरण्ये
५. अपेः पदात्
६. इतेः ।
७. तोऽचः
८. शोर्लुसयवरशोर्दिः
९. हे दक्षिणेऽस्य
१०. तु समृद्ध्यादौ ॥ ९ ॥
११. स्नमादाविल्
१२. पक्वाङ्गारललाटे तु
१३. सप्तपर्णे फोः ।
१४. मध्यमकतमे च
१५. हरे स्वी
१६. उलध्वनिगवयबिप्वचो बः
१७. ज्ञो णो ॥१०॥ ऽभिज्ञादौ
१८. स्तावकसास्ने
१९. णा वा चण्डखण्डिते
२०. प्रथमे प्थोः ।
२१. आर्यायां र्यः श्वश्र्वामूल्
२२. आसारे तु
२३. तोन्तर्येल् ॥ ११ ॥
२४. पारावते तु फोः
२५. उत्करवल्लीद्वारमात्रचः
२६. शय्यादौ ।
२७. त्वार्द्रे उदोत्
२८. स्नपि
२९. ओदाल्यां पङ्क्तौ
३०. फोः परस्परनमस्कारे
॥ १२ ॥
३१. पद्मे मि
३२. त्वर्पौ
३३. ईल्खल्वाटस्त्यानँ आतः
३४. इत्तु सदादौ ।
३५. आचार्ये चो ह्रश्च



३६. श्यामाके मः
३७. न वाऽव्ययोत्खातादौ ॥
१३ ॥
३८. घञि वा
३९. स्वरस्य बिन्द्वमि
४०. संयोगे
४१. त्वेदितः
४२. मिरायाँ लित् ।
४३. मूषिकविभीतकहरिद्राप-
थिपृथिवीप्रतिश्रुत्यत्
॥ १४ ॥
४४. रस्तित्तिरौ
४५. इतौ तो वाक्यादौ
४६. वेङ्गुदशिथिलयोः ।
४७. उ युधिष्ठिरे
४८. द्विनीक्षुप्रवासिषु
४९. तु निर्झरद्विधाकृञ्योन्ना
॥ १५ ॥
५०. ईतः काश्मीरहरीतक्यो-
र्लेलौ
५१. गभीरग इत् ।
५२. वा पानीयगे
५३. उल् जीर्णे
५४. तीर्थे हूचत्
५५. विहीनहीने वा ॥१६॥
५६. एल्पीठनीडकीदृशपी-
यूषविभीतकेदृशापीडे ।
५७. त्वदुत उपरिगुरुके
५८. मुकुलादौ
५९. रो भ्रुकुटिपुरुष इत्
६०. क्षुत ईत् ॥ १७ ॥
६१. दोदोतुत्साहोत्सन्नऊ
च्छासि
६२. दुरो रलुकि तु
६३. सुभगमुसलयोः ।
६४. हश्चौत्कुतूहले
६५. स्तौ
६६. सूक्ष्मेऽद्व्योतः
६७. अरदुकूले
६८. ईदुद्व्यूढे ॥ १८ ॥
६९. उल्कण्डूयहनूमद्वातूले
७०. वा मधूके
७१. इदे । न्नूपुरे
७२. ओल्स्थूणातूणमूल्यतूणी-
रकूर्परगुडूची ॥१९॥
कूश्माण्डीताम्बूलेषु॰।॰
७३. ऋतोऽत्
७४. आद्वा मृदुत्वमृदुकक्कशा-
सु ।
७५. इल्कृपगे
७६. शृङ्गमृगाङ्कमृत्युधृष्टमसृ-
णेषु वा
७७. पृष्ठे ॥ २० ॥ ऽनुत्तरपदे
७८. उद् वृषभे वुः

७९. बृन्दारकनिवृत्तयोः
८०. ऋतुगे ।
८१. गौणान्त्यस्य
८२. इदुन्मातुः
८३. वृष्टिपृथङ्मृदङ्गनप्तृकवृष्टे ॥ २१ ॥
८४. तु बृहस्पतौ
८५. उदूदोल्मृषि
८६. वृन्त इदेङ्
८७. ढिराहृते
८८. हृसे रि । सा
८९. केवलस्य रिः
९०. हृश्यक्सक्किपि
९१. ऋतुऋजुऋणऋषिऋष-
भे वा ॥ २२ ॥
९२. क्लृप्त इलि
९३. चपेटाकेसरदेवरसैन्यवेद-
नाखेचस्त्वित् ।
९४. सैन्धवशनैश्चरे
९५. त्वत्सरोरुहमनोहरप्रको-
ष्ठातोद्या ॥ २३ ॥
न्योन्ये वश्च क्तोः
९६. कौक्षेयक उत्
९७. शौण्डगेषु
९८. गव्यउदाइत् ।
९९. ऊ स्तेने वा
१००. सोच्छ्वासे
१०१. ऐच एङ्
१०२. अइ तु वैरादौ ॥ २४ ॥
१०३. दैत्यादौ
१०४. नाव्यावः
१०५. गौरव आत्
१०६. पौरगे चाउत् ।
१०७. उच्चैर्नीचैसोरअः
१०८. ई धैर्ये
१०९. वा पुआय्याद्याः ॥२५॥

इति प्रथमाध्यायस्य द्वितीयः पादः ॥

---

१. एत्साज्झलात्रयोदशगेऽचः
२. कदले तु
३. कर्णिकारे फोः ।
४. नवमालिकाबदरनवफलि-
कापूगफलपूतर ओल्
॥ २६ ॥
५. तुमयूरचतुर्थचतुर्वारचतु-
र्दशचतुर्गुणमयूखो ।
लूखलसुकुमारोदूख-
ललवणकुतूहले
६. निषण्ण उमः ॥ २७ ॥
७. अस्तोरखोरचः

GRANTHA PRADARSANI.

—:o:—

This Monthly Magazine consists of very rare and valuable ancient oriental works, on Vedic Literature, Hindu Philosophy, different sciences, general literature &c. that have never been published either in India or Europe. The Monthly issue of this Magazine dealing with one subject contains 32 Pages of Demy octavo size printed neetly in beautiful types on good thick paper, after being carefully corrected.

RATES OF SUBSCRIPTION.

| | |
|---|---|
| Annual subscridtion payable strictly in advance for foreign including postage. ... ... ... | 5 shillings. |
| Do. Do for India, Berma & Ceylon. ... | Rs 3 6 |
| Single copy ... ... ... ... ... | „ 0 6 |

RATES OF ADVERTISEMENTS.

| | |
|---|---|
| Full page per month. ... ... ... ... ... | „ 3 0 |
| Half page per month. ... ... ... ... ... | „ 2 0 |

SPECIAL RATES ON CONTRACT.

All communications should be addressed and remittance made to

Arsha Press, Vizagapatam. S. P. V. RANGANATHASVAMI
ARYAVARAGURU.
EDITOR & PUBLISHER.

[ G. / 2 ]
5000—15-9-11.

# NOTES.

44

Petition

NOTES. 45 (1) Page 1

Public Dept

[C. 1784] From S.P.V Ranganathaswami Aryavaraguru Vizagapatam dt 17-3-12.

Requesting Govt to subscribe for 50 copies of 'Grantha Pradarsani'

For the U.S.

It is open to question whether the importance of the journal is such as the Editor wishes to make it appear. Perhaps the Curator, Oriental Manuscripts Library, may be consulted u.s. on the point through Educational.

KM
23.3.12

25.3.12

Please put up precedents showing how such applications are dealt with.

28.3.12

For the U.S

X Please see G.O. 144 R dt 8.3-11 and other G.O.s put up. If it is decided not to subscribe for the journal, draft order placed below is for approval.

KM
27.3.12

27.3.12

The opinion of the Curator may first be obtained.

28.3.12

Ed dept

Edl C. no 1014
Regd 30. 3. 1912

LOCAL & MUNICIPAL SECRETARIAT 30 MAR 1912

Pub. C.no 1784-1
29.3.12

46

Educational Department

A draft endorsement is submitted for approval.

PR
30.3.12

CR
1.4.12

[Endt. No. 1014-1 Edl. dy. 2nd April 1912].

---

C No. 1334 From the D.P.I. No. 2921/12 dy. 4-5-12.

---

pages 7 & 8 of C.F.

The Curator, Oriental Manuscripts Library states that the journal is a useful literary publication and recommends that 10 copies of it may be subscribed for by Govt. and that as a further help a suitable honorarium may, if considered desirable, be given at the end of each year.

p. 2 of C.F.

2. The petitioner does not ask for an honorarium. He requests that 50 copies of the journal may be subscribed for by Govt. The Curator's recommendation for the grant of an honorarium is based on the ground that 50 copies of the journal cannot be properly utilized by Govt, if subscribed for. ~~It does not~~ ~~that~~ An honorarium (in such cases is not usually) granted — Cf. para. 2 of office note on p. 2 of notes to G.O. No. 436 Edl. dy. 26th July 1910.

M.

3. As regards the question of subscribing for 10 copies of the journal the D.P.I. does not say how they can be distributed or whether he requires either more or less than that No. (for sanskrit schools & other institutions) He may be requested u.o. to furnish this information. A copy may perhaps be needed for the Connemara Library.

4.

PR
15.5.12

CR
17.5.12

47 13

H.E. the Governor.

I do not think that more than 2 copies need be taken one for the Gr. Mss. Liby. & one for the Government Liby. Private students would not find the Magazine beyond their means.

[illegible]
18.5.12

~~I cannot see what the publication costs~~ We should be able to distribute 10 copies with advantage to libraries & colleges for use of the Sanskrit students. The annual subscription is 7 ... only Rs. 3.6. We may take 10 copies & ask the D.P.I to distribute as he thinks best.

[illegible]
21.5.12

A draft order is submitted for approval. It follows the precedent in Gone 509 Edl dy 26.7.4.

N.

PP 23-5-12 CR 24.5.12

D 25.5.12

PR 22/5

20
18-5-12

[ E. & L. / 74 ] 1,800—8-12-10.

14

Edl. DEPARTMENT.

48

READ AGAIN G.O., No. ______, dated ______ 191 .

" " " " ______, " ______ 191 .

READ ALSO—

C. No. 1784 Pub From the M.R.Ry S.P.V. Ranganathaswami Aryavaraguru No. ______, dated 17-3-1912

" " 1334 " " " D.P.I. " " 2921/12, " 4-5-1912.

" " ______, " " ______, " ______, " 191 .

ORDER. No. 453, dated 28-5-1912.

Mis.

Dp 25/5

M.R.Ry S.P.V. Ranganathaswami Aryavaraguru will be informed that the Govt. are pleased to subscribe for ten copies of the Sanskrit journal entitled "Grantha Pradarsani" published by him.

2. The Supdt. of Stationery will be requested to arrange for the supply of these copies to the ~~libraries, colleges and offices~~ including the Connemara Public library, the oriental manuscripts library ~~and offices where colleges to be named when at ..._ ... to him~~ and such other libraries and colleges as may be named by the D.P.I.

PP 23.5.12

Cd 24.5.12 2537

Despd 28/5/12

Despd 28/5/12

To,

M.R.Ry S.P.V. Ranganathaswami Aryavaraguru

The D.P.I.

" Supdt. of Stationery

" Principal Librarian, Connemara Public Library

Signed copies herewith

30/5/12

49

*When given for copying* ______
*When copied* ______
*When examined* ______
*When signed* ______
} 191

READ AGAIN G.O., No. , DATED 19 .

CURRENT No.

ENCLOSURES TO C. No.

ORDER OF GOVERNMENT. A A A A A A A

LETTER OF GOVERNMENT.

STATEMENT WITH DITTO.

PAPERS NOT FILED UP, BEING MEANT FOR DESPATCH IN ORIGINAL.

*N.B.*—
A = Copy in full.
B = Not to be copied.
P = Copy abstract only.
Q = Copy heading only.